भावक्रियात्लाभायतदिति वाच्यम् नचपाकरत्याद्यतानाहृष्यीति नातिप्रसंगः द्वि
र्वचनमिति च द्विः प्रयोगो द्विर्वचनमिति स्तुत्यन्याद्विर्वचनेचीति ज्ञापकेवाश्रित्यो
पपादनीयमित्याहुः १ अतिप्रसंगास्त्वितिप्रवोक्तप्रयोगापत्तिरूपस्त्वित्यर्थः अ
नभिधानादितितेषां द्विःप्रयोगादित्यर्थः मतान्तरमाहकेचित्विति तस्यापा
देतिपूर्वापरीभूतावयवसमुदायरूपक्रियायापदेत्यर्थः एवकारेणरूपग्र
णयोर्व्यवच्छेदस्तयोः सकृदेवोपात्तेः क्रियायास्त्वनेकस्याअपितिरूत्तभेदापा
यात्वबाध्यत्वोपगमेन तज्जन्मा निपातः पुनः संभवादिति भावः सामर्थ्यादिति
अभ्यावृत्तिविषये सामर्थ्यं च क्रियालोपकार्थत्वमेव तथापि तज्जन्यगणनतात्प
र्यविषयत्वात्तन्त्रनादित्यतात्पर्यविषयत्वेद्वौपाकावित्यत्र द्विर्वचनानापत्ति।
रतएवद्विःप्रयोगाविति नेनितमत्त्वित्याय केसत्रेस्पष्टोयमर्थइतिभावः पुनःप्रेति
विवरणप्रतिपादकभाष्यप्रयोगेणेत्यर्थः ज्ञापकमितिताद्दृशसूत्रकृत्प्रयोगा

पि॰

हृपं तमित्यर्थः अत्र क्रियापदस्योक्तार्थपरत्वेयात्वर्थात्मिकोनामाख्यातदोषा

वि. कात्यादावतिप्रसंगाभावेन क्रियापदस्यस्पष्टप्रतिपन्नार्थत्वेवोचितानांतत्रैवसत्त्वा।

भाष्ययोरनुगुणपात् उक्तप्रयोगाणामेवानभिधानमाचितमित्यर्थं वर्णकृवि

मेनेवसत्यते २ ननमिद्धान्ते बोधकतारूपाशक्तिराख्यानशक्तिरत्रवत्तौ बोधा

दावपणकीतियाननोऽवभावनावाच्यानाख्यातस्येतिकथं निर्णयस्तयाशोकाम

मायत्ते भेद्यभेदकसंबंधाघापाधिभेदनिबंधनम् साधुत्वेनतदभावेपिबोधेनेद।

निवार्यतो भेद्यविशेषाभेदकेविशेषणानतयोर्यः संबंधस्तस्ययउपाधिभेदस्तन्नि

बंधनेसाधुत्वम् अयमर्थः व्याकरणस्मृतिः शब्दसाधुत्वमात्रैवावच्छेदकता।

याकल्प्यधर्मस्यशब्दत्वेवदतोमीमांसकानांपुनः शब्दत्वेसाधुत्वमित्येकमेवेति

तद्वीस्याविचारेसाधुत्वनिर्णयप्रत्ययशक्तिनिर्णयश्चात्ते अतिरिक्तशक्तिवादेप्या

ख्यातानामसाधुताभावनायाःस्यादेव नचाचकतत्यर्थेषेतत्तीयाप्रयोगानवशान

र्थभावनायामाख्यातप्रयोगेयालेकर्मणिसाधुत्वाद्प्रयोगात्रान्तवदेदितिनि

ल॰
द॰
५५

59

षेयोहेयचनप्रयुक्तम प्रायश्चित्तेद्दर्शनोनतरीयचुत्पत्तिमत्तास्यादिति १ सिद्धान्तइ
ति इन्द्रियाणांस्वविषयेनिमादिनावस्माणाबोधकत्वरूपाशक्तिरित्यर्थः श्र
वणकत्वउपपत्तिमाहबोधादिति शाब्दसाधुत्वेति नउक्तम साधुत्वज्ञानविष
यासैषाव्याकरणस्मृतिरिति तत्रेतिसाधुशाब्दज्ञानेअवच्छेदकरूपेणेतिताहृशाशा न॰
वृत्तानिपृ सा॰ ब्दबोधजनकतावच्छेदकत्वेनेत्यर्थः अतिविकशाक्तिवादेपीतिसा
धुत्वेनशक्तत्वेअसाधोरपिबोधात किन्तुबोधकत्वमितिवस्माणामेवेपीस
र्थः असाधुत्वास्यादेवेति तथाचयमर्थंबोधयितुंयः शब्दःशास्त्रेणानुशिष्य
तेतदर्थबोधेतस्यैवसाधुत्वेनप्रकृतेव्यापारत्वावच्छिन्नार्थबोधमद्दिश्यलक्षा
णविधानात्तत्रतस्यासाधुतास्यादेवेतिभावः नन्वस्तुसाधुत्वानस्यावास्माकं
कान्तिवनआह याज्ञेकर्मणीति याज्ञस्यकर्मणामन्तवचननिषेधफलकत्वप्र
करणोपादानकतदर्थेनैनतस्वततस्येयोगेप्रसवाधाभावः स्याते स्यादेवेतितद्बो
धकत्वेनाख्यानस्यसूत्रकारादिभिरनन्वशिष्टत्वादितिभावः मीमांसकःशे

कृते २ ननु त्वन्मते नान्वितमिति निषेधः कर्तर्य्येव न सिद्ध्येत् आख्यातेन ।
कर्तुः कृतो बाधितत्वात् पुरुषार्थत्वेन स्यात् प्रकरणादिकं तर्य्येतानन्वयं कृति वि
रोधे बाध्यत इति चेन्न लिङर्थस्य विशेषणामिष्टत्वेन परिहृतत्वात् नहि गुण
भूतः कर्ता निषेधे सांगत्वेन गृहीतम् मतम् भावनानुप्रधानत्वेन गृहीतम् मम ।
र्थेति प्रकरणात् कर्तर्य्येव प्रसक्तत्वात् कर्तव्यत्व पुरुषधर्मः प्रत्यक्षेण विशेष्या भा
३. वात् नेक्षेतोद्यन्तमादित्यमित्यादिवत् इति वाक्योक्तमंत्र विधिवत् इत्या
दिप्रघोषेण प्रपंचिते २ त्वन्मत इति प्राभाकरीयमत इत्यर्थः न सिद्ध्येदिति कर्त
र्य्यत्वाभावे हेतुमाह आख्यातेनेति तथा चाख्यातकृतात्कर्तृबोधात् तस्य च
प्रत्ययार्थत्वेन प्राधान्यात् त्वन्वयेन तस्यैव तन्निषेध्यस्यापि कर्तृविशेषणस्य कृत्या
पुरुषार्थतायामेव भावादिति भावः प्रकरणादिति तन्निषेध्यस्य दर्शपूर्णमा ।
३. स प्रकरणे पाठादित्यर्थः ननु कृतेः प्रकरणेन बाधे कर्तव्यर्थत्वं तन्निरतत्वाह ।
नचेति प्रकरणं चेत्यर्थः कृतिविशेषस्य इति निषेधस्य कृतिविरुद्धत्व इत्य

लं• ष• ९•

60

र्थः श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां विरुद्धानामेकत्रोपनिपा
ते पदिनेषु र्वोपलत्वयोनरतो यस्यैजैमिनिना दौर्बल्यमभिद्धांतितत्वादितिभा
वः समायत्नेनेति उर्थक्षितितथा वाख्यानश्रुत्या वात्तेरूपस्यापत्नेपि न भावना
वत्तस्य प्राप्तावैयेन निषेधस्य तद्विशेषणत्वेन प्रकृतार्थता सम्भाव्यते किं यात
र्थभावनाविशेषणत्वमेव तयोपस्थितस्य च विशेषणस्य श्रोतस्यापि कर्त्रेनो
र्थो भावस्यैवेयासंभवाज्ञाज्ञश्रुत्याप्रकरणबाधयत्पत्पभिप्रेत्याह सांगत्वेने
ति स्वविशेषणत्वेनेत्यर्थः नन्वेवं पाणिनीयमते न कर्तृत्वं भवत्येव दिशा येवा
प्युक्तप्रत्याकलेनभवत्वादिनिषेधस्यापि प्रकृतार्थतान स्यात्तत्राह श्रुत्वे
वेति अनुष्ठानइति पर्युदासलक्षणनिषेधस्य प्रकृतधर्मत्वेपन्नतस्य प्राप्या
प्याप्यतानीभूत यजमानस्यैवानुष्ठानपरित्यागः सिद्ध्यति कर्तृत्वेनैकदे
नपेक्षत्वयाप्यत्तमहत्वक्रिंगादिसापाबाक्येन तन्निषिद्धविशेषणत्वया।
पिश्रुतिप्रकरणाभ्यां कर्तृत्वमेवद्ध्यकृतकर्तेकानुष्ठानाभावश्रतिबोधयेया।

९•

बोद्धव्यस्त्वाग्याग्याज्ञदोषइतिबोध्यम् नन्वेवं कस्तृमत आह जेजृम्भमाणेन
ब्रूयादित्निमयि दत्तकृतस्त्र इति मेज्ञानत्ववचनाभ्यवाक्याम कृषार्थेनेप्रकरणेण।
दात्कनत्वमितिमेदेहप्रकरणाभ्यवाक्यापेदत्यादेवत्वाम कृषार्थेनशर्वेपा।
त्तितेक्ष्मादीनामनेपावाविरोधपवबाध्यबाधकभावोपपन्नयेवलावलवि
तानत्वस्लिविरोधः जेजृम्भमाणपदस्पर्शकत्वेवाचकतयातादृशापुरुषस्फृता
वपिसत्वात्तत्वेस्फोटस्यालिनकृत्वेगतास्पतितितिसिद्धोलिनम् तन्नकुर्ति।
प्रकरणाभ्यामत्रकृतत्वंसंवइपुरुषधर्मतेवोचितेनेतिभावः वत्नर्थपादमव
तारयति तत्वाख्यातस्यभावनायामसाधुत्वम् ननत्वदोषोनस्यात् सा
धुत्वज्ञानस्यधर्मात्वेहेतुत्वादित्यत आह बोधइतिअसाधुत्वेपिसाधुत्वभ्रमाद्बो
धोस्त्वनामअपभ्रंशावर्साधुत्वेतस्यादेवेतिभावः वस्तुतः साधुत्वज्ञानेनेदस्तु
लब्धातिरेकनिर्णयोपिनअप्रतिबंधकस्यसाधुत्वमानेनेत्यत्रवक्ष्यामः दे
वोजिभट्टपुत्रेणकौंडभट्टेननिर्मिते श्रीभूषणसारेस्मिन्याताख्याता।

र्थनिर्णयः ॥ इतिश्रीवैयाकरणभूषणसारे धात्वाख्यातसामान्यार्थयो
र्निरूपणं समाप्तम् ॥ ननु इति आख्यातादिरित्यर्थः तद्बोधक इति भावनाबोधक इत्य
र्थः भावनानिरूपितसाधुत्वस्याख्याते सत्त्वादिति भावः साधुत्वेन स्वरूपम्।
ख्येद्बोधेहेतुः किंतु तत्तानेनत्स्यपभ्रमात्मकस्याप्तिमौलभ्यमित्याशयः।
वगाप्यतिश्र साधुत्वेपीति ननु साधुत्वज्ञानं विना शाब्दबोधोदयेन कथं तत्र।
तदेतत्तासाधुत्वस्य शक्तिस्वरूपतायां निराकरिष्यमाणत्वाच्चेत्यत आह।
वस्तुत इति तद्व्यतिरेकनिर्णय इति असाधुत्वनिश्चय इत्यर्थः तन्निश्चयेप्य
पभ्रंशाच्छाब्दबोधदर्शनाच्च वाख्यातादासाधुत्वनिश्चयदशायामपि भावनाबोधो
पपत्तिरिति भावः २ इति लघुदर्पणे धात्वाख्यातार्थनिर्णयः ॥ ॐ श्री
गणेशाय नमः लकारसामान्यार्थे निरूपितेन निरूपितायाप्रतिबंधकतज्जि
ज्ञासायामवश्यवक्तव्यतद्विशेषार्थे निरूपयितुमवसरसंगतिं स्पष्टयन्ना
ह २ प्रत्येकेदशलकाराणामर्थं निरूपयति १ दशेति दशाल्लडित्यादय।

यष्टितः षट् लन्नादयोऽङितस्सनाद्यः २ वर्त्तमानेपरोदेशोभाविश्चपूर्वोभवि
ष्यति विध्यादौप्रार्थनादौच क्रमात्तेषां लड़ादयः लड़ादयष्टितः षट्क्रमेण।
येषु ङ्इत्याः तथाहि वर्त्तमानेलट् वर्त्तमानेलट् इतिसूत्रेण प्रारब्धापरि
समाप्तत्वे भूतभविष्यद्भिन्नत्वेवावर्त्तमानत्वम् पचतीत्यादावधिश्रयणाद्य
यः श्रयणान्तमध्येतदस्तीतिभवतिलस्ययोगः १ प्रारब्धेतिविनष्टावय
वप्रागभावत्वेसत्युत्पन्नध्वंसान्यावयवकत्वमेकक्रियायांवर्त्तमानत्वमित्यर्थः
भाविभूताक्रिययोरतिप्रसङ्गवारणायक्रमेणदलद्वयोपादानंलक्ष्येलक्षणं।
ग्राहयति पचतीति अधिश्रयणादीतिसाध्यत्वप्रकारकप्रतीतिविषयत्वे
पचीभूतावयवसमुदायेभावनात्वस्यव्यवस्थापितत्वादितिभावः यद्यपिभा
वकालकारकसंख्यास्तुनाद्योधात्वाख्यातयोरितिनिरुक्तभाष्यात्कालनिर्देशवर्त्त
मानत्वमेववक्तव्यम्चितेनतथापिवर्त्तमानोव्यापारइतिप्रतीत्याक्रियायामपि।
साक्षाद्वर्त्तमानत्वावगाहनेनतदुक्तमेवतन्निरूपितमित्यदोषः नानात्वा

लं. ६२

यर्थव्यापारेनकाल्पनिकावयवत्वमादायतदुपपत्तिरितिबोध्यम् भूतभवि
ष्यद्भिन्नत्वंवेतिवाकारेणास्यांशेसर्वत्रलक्षणापत्तयामपारकृतत्वात् भविष्यत
स्यवर्तमानत्वघटितत्वेननतद्रूपेभविष्यत्वघटेचनरत्वक्षितिरभिन्नत्वरूपवर्तमा
नत्वघटकस्यतत्त्वोन्याश्रयाच्च एवंभूतत्वमादायाप्यन्योन्याश्रयोद्रष्टव्यः नत्व
यत्रात्मादितिष्ठत्यपैतत्वथात्वर्थत्वान्तनित्येतस्मिन्नुकत्वलक्षणस्याप्यस्यात्मा
त्मीत्मादिप्रयोगस्यानुपपत्तिरतआह २ आत्मादिषुपर्वताःसन्तीत्यादौतात्का
लिकत्वांशतोक्रियायाअनित्यत्वात्तद्विशिष्टस्यात्मादिकमादायवर्तमानत्वात् । त्व.
उक्तंचभाष्ये ऽत्रभूतभविष्यद्वर्तमानानांराज्ञांक्रियास्तिष्ठतेरधिकरणमि ।
ति एतेनाभियतेसर्वमात्मातत्वनविकल्पते पर्वतादिस्थितिसत्त्वस्यात्यन्तवह्न
पेणाभियतइतिवाक्यपदीयेच एवंवतमस्यासीत् तृत्त्वेनात्वयितिरितेयदा
सीत् अहमेकःप्रथममासेवर्ताभिभविष्यामिचेत्यादिप्रयुक्तयोपियोज्याः ।
अनित्यत्वादितिपूर्वापरीभूतावयवत्वादित्यर्थः तद्विशिष्टस्येतिताद्रूप्या ।

तिङन्तविशिष्टक्रियास्वरूपस्येत्यर्थः आदायेति आरोप्येत्यर्थः वस्तुतस्तु
क्रियाद्यात्मकत्वंऽकालगतमेवतत्तु तादृशकालस्यचसर्वत्रधात्वर्थव्या।
पारैकरूपेणान्वयाभ्युपगमउचितइतिदर्पणोक्तम् व्यक्तम तत्रभाष्यसंम
तिमाह उक्तेहीति तिष्ठन्तीति धात्वर्थस्थित्यादिव्यापारस्येत्यर्थः अधिक
रणामितिकालिकसंबन्धेनेतिशेषः तथाचतत्कृतवर्तमानत्वस्याधेयतासं
बन्धेनतद्विशिष्टक्रियायामारोपादात्मास्तीतिप्रयोगोपपत्तिरितितद्भावः प
र्वतोभिद्यतइति सर्वपदव्याख्येयधर्मव्यापारसामान्यमात्रेतदपेत्याध्येनवर्तमा
नत्वादिनान्यव्यापाराद्याहृतेभवत्यात्माश्रयकस्थित्यादिव्यापारस्तुनत।
त्वाहृतेभवितुमर्हतीतितदेतद्वर्तमानत्वादेरभावादेवचात्मास्तीतिप्रयोगा।
नुपपत्तिरितिकारिकाश्चोद्यार्थःसमाधत्ते पर्वतादीतिप्रादिनात्मादिपरिग्र
हः तस्यादितिविशेषणानिविक्तपदार्थस्य स्वतोव्याहृततत्वासंभवादात्मादिस्थि
तिरपिगत्यादिक्रियाघात्मककालस्वरूपेणवर्तमानत्वादिनाध्यस्तेनकि।

ल॰
द॰
६३

63

योनद्यांस्नाताभवतिश्वतिनद्यांस्नपपत्तिरित्यर्थः नगर्यामासीदिति नगरमोक्ता।
नस्थितिः सद्यातनत्वेपिप्रयोगस्यप्रत्येककालिकत्वमादिक्रियागतभूतत्व।
मारोप्योक्तप्रयोगाउपपाद्याः एवंभविष्यामीमांसयापीति क्रियागतभवि।
ष्यत्वारोपात्तथेत्यर्थः लङादिष्वपत्तद्वयस्याविशेषेणाकरणेह्यस्तनोस्मच।
यज्ञादौद्योतकतापत्तेःसमर्थयते २ तच्चवर्तमानत्वादिर्लङादिभिर्द्योत्य।
तेक्रियासामान्यवाचकस्यतद्विशिष्टलक्षणायांलङादेस्तात्पर्यग्राहकत्वे
नोपयोगात् अन्वयव्यतिरेकाभ्यांतद्रूपलङादिवाच्यमेव अन्यथाप्यन्यथा।
नोवाचकत्वविलोपापत्तिरित्यपिपर्यालोचनम् १ क्रियासामान्येतिकाल।
सामान्यवृत्तिक्रियावाचकस्येत्यर्थः तद्विशिष्टेत्यत्रकालविशिष्टव्यापार
इत्यर्थः लङादेरित्यादिनालिङादिःसंगृह्यते उपयोगादितितथाचतत्त।
द्विशिष्टवैयर्थ्यमितिभावः द्वितीयंसमर्थयते अन्वयेति नचतत्तद्विशिष्टैः
कर्त्राद्यर्थवाचःशक्यतावच्छेदकभेदात् सतिलःकर्मणीतिसूत्रस्यलङा।

६३

तस्य

द्विविधायकैर्बाधे निरवकाशत्वाभावान्नर्थकत्वप्रतिहतानामितिन्या
योग्यत्वादितिभावः अन्यथेतितयोःशास्त्रयोर्ग्रहकत्व
सर्वज्ञप्रकृतेर्वचनस्ययथार्थत्वाभिमतत्वबोधोपपद्यते इतिभावः २ लि
डर्थमाह परोक्षइतिपरोक्षेलिडितिसूत्रात् कालस्त्यावश्यत्वान्नद्यतनत्वभेदेन
द्विविधः द्विविधोपिभूतभविष्यद्रूपः तत्रानद्यतनेभूतेपरोक्षेलिडित्यर्थः ते
नानद्यतनेभूतेनद्यतनेभविष्यति भूतेप्यपरोक्षेचनलिटःप्रयोगः परोक्षत्वंचसा
क्षात्कारीयतादृशाविषयताशालित्वानाविषयत्वं १ अनद्यतनेभूतइतिपर्व
सूत्राभ्यांतत्स्पष्टत्वेनेतिभावः नलिटःप्रयोगइति उक्तार्थस्यबाधादितिभावः।
ननुपरोक्षत्वमिन्द्रियजन्यज्ञानाविषयत्वं यदितदायज्ञार्थदेवदत्तोयाजीदितिकि
याशाउपनीतभानात्मकेदेवदत्तीयेलौकिकंप्रत्यक्षेतत्रायंप्रयोगेविप्रयोगान्नु।
पपत्तिःक्रियायांप्रत्यक्षाविषयत्वरूपपरोक्षत्वबाधादतआह परोक्षत्वंचेति
लौकिकेतिवरूसाक्षात्कारीयलौकिकविषयत्वाभावत्वमित्यर्थः तेनना।

त॰
दि॰
६४

कृष्यत्वेनलिङ्गप्रयोगानुपपत्तिरितिभावः २ नचक्रियानामेयमत्वेनापरदृष्टैप
दार्थीभूतावयवानराकाण्यपिंडीभूतानिर्दर्शयितुमितिभाष्यानस्याश्रतीङ्गित
त्वेनपरोक्षस्यव्यावर्तकत्वमितिशंकाम पिंडीभूतायानिर्दर्शयितुमशक्यत्वे।
पिअवयवशः साक्षात्कारोमीतिविषयत्वसंभवात् अन्यथापरपरोक्षयावती
त्यत्वतस्यादर्शनकर्मतानस्यादितिप्रतिभाति व्यापारविशिष्टानांक्रियात्वेनक्रत
साधनानामेवव्यापारोऽस्येविवक्षितमतोनोक्तदोषः अयंपरपरोच्यमानेतुयथा।
व्यापारविशिष्टानामित्यपिवदंति २ अत्रैवेनापरदृष्टेतिपरोक्षप्रमाणानरोपेक्ष्य।
योक्तेनप्रत्यक्षप्रमाणेनदृष्टाविषयीकृतापरदृष्टानपरदृष्टापरदृष्टानस्यात्
तत्पुरुषेनसमासः अन्यत्प्रमाणेनकथमपिनविषयीकृतेतियावत् समाय
नेपिंडीभूतायाइति तथाचयस्ववयवानांसाक्षात्कारविषयत्वात्तद्व्यावर्तकत
याविशेषणत्वादितार्थ्यमितिभावः अवयवशः साक्षात्काराभ्युपगमेभाष्यस।
मतप्रयोगानुपपत्तिःप्रमाणायत्तस्यपेति ननुकृभाष्यप्रामाण्यात्क्रियायाः २।

वतस्वयत्नानामप्यतीतत्वमेव तेषामपि समूहालम्बनैव यत्नवाच्यत्वात् ।
पप्रयोगो यावतीत्यादौ तद्दृष्टान्तेन सामान्यार्थो यावन्निर्वर्त्तनप्रेप्सा संयोगाद्
पफलपरस्तिनतस्य कर्मत्वानुपपत्तिरतो मतान्तरमाह व्यापारविशेषणात्तामि
ति एवं चातीतानद्यतनव्यापाराविष्टपरोक्षकर्त्रैकक्रियाहेतुर्यो नोऽतीडि
ति सूत्रार्थः व्यापारविषयत्वविशेषणास्य व्यावर्त्तं दर्शयति तत्रयेपपाचेति वदे
तीत्यस्य भाष्यानुग्राहकशुक्तिपदत्वस्तिशेषः विस्तरस्तदर्पणावलोकनीयः
कथं तर्हि व्यातेनेकिरणावलीमदयनस्तिस्वक्रियायाः स्वप्रत्यक्षत्वादिति ।
वेत् प्रसंगतमेव व्यासंगादिना स्वव्यापारस्य परोक्षत्वोपपादने पिश्रुनद्यत
नातीतत्वयोरभावेन तदर्थक लिङसंभवात् । व्यासंगादिनेति
नादिति शेषः मत्तोऽहं किल विललापेत्यादौ यथा तद्वदित्यर्थः लिङसं
भवादिति वक्तृत्वविवक्षाया एव प्रयोगनियामकत्वस्य स्वयंवक्तुमाशक्य
तयात द्विवक्षायां तादृशप्रयोगः स्यपपाद इति चान्यत्र प्रपंचितम् लुङर्थ ।

ल॰ र॰ ६५

मारः श्वो भाविनीति अनद्यतने भाविनीत्यर्थः अनद्यतने लुडिति सूत्रात् य
था श्वो भवितेत्यादौ । श्वः पदस्याव्यवहिते भाविदिने रूढत्वेनानद्यतनका
स्य लुडर्थकत्वेनैकदिनोत्तरदिनभाविकालस्य व्यापारबोधने लुडो साधुत्वा
पत्तिरतः श्वःपदं व्याचष्टे अनद्यतन इति तथा च मूले श्वःपदमनद्यतनत्वे
नानद्यतनकालमात्रपरमिति भावः अतीताव्यवहितरात्रिपश्चार्द्धोपेता
गामिरात्रिपूर्वार्द्धोपेतदिवसात्मकः कालोऽद्यतनस्तद्भिन्नकाल इत्यर्थः ए
वं सो भूतस्यत्रापि ह्यःपदं व्याख्येयम् अत्रेदमवधेयम् अनद्यतनभूतपद
भूतत्वमात्रविवक्षायां तत्र लङ् न तदापश्चान्तराप्यः पदेन संबंधेऽनद्यतन
त्वप्रतीतिरिति निष्णोपाल्लीदिति ह्रुङ्वेपपत्तिरिति एवं श्वोऽपयस्यमाणो

लु

देवतावसतीति लुङ्भोपिसेति लडर्थमाह भविष्यतीति भविष्यत्सामा
न्य इत्यर्थः लृट् शेषे चेति सूत्रात् यथा च रोमभविष्यतीत्यादौ तत्त्वं च वर्त॰
मानप्रागभावप्रतियोगित्वं समयोत्पत्तिमत्त्वम् । भविष्यत्सामान्य इति

65

तद्विशेषविवक्षायां लङादिना बाधनादिति भावः ननु भविष्यत्वस्य वर्त
मानप्रागभावप्रतियोगिसमयवृत्तित्वरूपत्वे घटनाशस्य विद्यमानताद
शायामपि घटो नंक्ष्यतीति प्रयोगापत्तिरत आह नत्वेवेति तथा च घटना
शस्य तादृशसमयवृत्तित्वेपि तत्समयोत्पत्तिकत्वाभावान्न तदापत्तिरिति भा
वः वस्तुतस्तु वर्तमानप्रागभावप्रतियोगित्वमेव भविष्यत्वं वैयाकरणा
नये उक्तनाशसामग्रीरूपे नीते व्यापारे नाशविद्यमानतादशायां यथाश्रु
तभविष्यत्वस्य बाधादेवोक्तप्रयोगापत्त्यसंभवात् अन्यथाश्रयकत्वनादेः।
यथाश्रुतभविष्यत्वबाधात् तदुपपन्नये समयघटितस्य तस्याभ्युपगमेप्युत्प
त्तिनिवेशान्नसुकरं विंसमपव नैयायिकमतसमर्थनाय वैयाकरणानामनुत्पत्ति
निवेशात्तन्नेष्यत्वमनुचितमेवेति बोध्यम् लेटोर्थमाह विध्यादाविति लि
ङर्थे लेटिति सूत्रात् लिङर्थश्च विध्यादिरिति विवक्षते लोडर्थमाह प्रार्थ
नादाविति आदिना विध्याद्याषाषाशृह्यन्ते आशिषि लिङ्लोटौ लोडुक्ति।

सञ्ज्ञाभ्याम् । विध्याद्याशिषश्चेति लोडाद्यैतच्छब्दप्रयोगनिश्चितप्राप्तदिति वि
षयके त्वाचार्यमतम्ः २ तस्यतथावगमात् यथा भवतुतेषिावप्रसा देश
तिपतयोरर्थे लिङर्थपदत्रयाणां समानार्थत्वादि निनन्निर्णये नैवनि— णीयः १
भवन्तश्चेति ताहश्याशब्दप्रयोक्तिस्थानविषयत्वात्संबोधिताविप्रसादकर्तृकेभ
वनमितिवाक्यार्थबोधः तन्निर्णयेनैवेति वक्ष्यमाणलिङर्थनिर्णयेनैवेत्य
र्थः २ लङादिक्रमेणाङितामर्थमाह स्यात्भूतेप्रेरणादौचभूतमात्रेलङाद्य
सत्योक्रियातिपत्तौचभूतेभाविनिलृङ्स्मृतः लङर्थमाह स्यात्भूतेचानद्यतन
इत्यर्थः अनद्यतनेलङितिसूत्रात् यथाऽस्यच्छ्रोभवदित्यादि अस्यपुत्रश
ति वर्तमानध्वंसप्रतियोग्यनद्यतनकालहत्तित्वैतत्संबोधिपुत्रकर्तृकोत्प
त्तिक्रियोत्पादकस्य नित्यं नाधः २ लिङर्थमाह प्रेरणादाविति विधिनिमं
त्रणामंत्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङितिसूत्रात् विधिः प्रेरणोभृत्यादे
र्निकृष्टस्यप्रवर्तनम् निमंत्रणंनियोगकरणंआवश्यके प्रेरणमित्यर्थः आ

मेत्वणे कामचारानुज्ञा अथ्वीश्वमत्कारश्शर्वकोव्यापारः यत्नस्वरूपयानत्ता
तप्रवर्त्तनात्वेनवाच्यतालाघवात उक्तं च प्रवृत्तिप्रवर्त्तनारूपमनुस्यूतं च ता।
ष्वपि तेष्वेव लिङादिप्रत्ययानव्यः किंभेदस्याविवक्षया मायवुध्याद्यनार्थेवाप्रपं।
चार्थमयापिवा विध्यादीनामुपादानेचतुर्णामादितः कृतमिति प्रवर्त्त।
नात्वेचप्रवृत्तिजनकज्ञानविषयतावच्छेदकत्वम् तच्चेष्टसाधनत्वमस्ती
दीतिविष्णू तितस्तेवविपर्ययः सज्ञादिप्यादीनांलिङर्थत्वप्रतीतेः कथंप्रेरणादेर्लिङर्थत्व
मतआह विधिः प्रेरणामिति तथा च विधिप्रेरणापदयोः पर्यायतात्प्रेरणा।
यालिङर्थत्वानुपपत्ति रितिभावः साचप्रेरणानलिङादिवृत्तितप्रयोगस्य।
पाकिंतवसमाधानार्थंहृदयेमाह प्रेरणादेर्विधि अयमाशयः यद्विषयकत्वेनत्ता
नस्यप्रवृत्तिजनकत्वं सैवप्रवर्त्तनातत्त्वेचइष्टसाधनत्वस्यैवेनत्वालिङादिवृत्ति
तयाद्दृश्यतद्विषयकज्ञानस्यस्वतन्त्रप्रवृत्तौव्यभिचारितत्वात् तथाचेष्टरूपेत
यापकृष्णोद्देश्यकप्रवृत्तिजनकज्ञानविषयत्वलक्षणप्रेरणामितिव्यवक्रियते।

ले॰ १९

प्रत्यादृक्कृतिमेत्रणादिविदेः तथाच स्वाभिलषितोपायाज्ञानात् प्रवृत्त्यापकृष्टप्र
योज्यस्योपायविषयकप्रवृत्त्यनुकूलो व्यापारः प्रेरणेति पर्यवस्यतीति तत्रवे।
दिकमुदाहरणम् स्वर्गकामो यजेतेति स्वर्गकामाभिन्नकर्तृकयागभाव।
नास्वर्गेष्टसाधनमिति बोधः अन्यासन्याभावनायां स्वर्गकामेष्टसाधनत्वे।
वगतेन नाहृष्णास्वाहृमित्यभिसंयानायागादौ नियोज्यस्य प्रवृत्तिर्निर्वहति लौ
किके त्वक्षमिकामः पचेतेत्यादि बोधः स्वयम्मूल्यः निमंत्रणाद्यपि समतप
ब्रतया वा चेष्टानियोगाकरणमिति विशेषनिमंत्रयतश्रुत्यतो विप्रनिष्ठप्रव
र्तनाबोधेन प्रकृतेनियोगपदार्थः प्रवृत्तिस्तत्कारणेत्तरदनुकूलो।
व्यापारस्त्वर्थः आवश्यकमिति आइभोजनादावित्यर्थः प्रेरणेति प्रवर्त
ने त्वर्थः अध्यापयेदिह विद्यादित्यादिः तत्राप्रवृत्तस्य प्रवृत्त्यनुकूलव्यापार इति
यावत् यथेह भंजीतेति कामचारानुज्ञेति स्वेच्छया प्रवृत्तस्य तत्र प्रवृत्ति
प्रतिबंधेन स्वोप्सितविषयकप्रवृत्त्यनुकूलो व्यापारस्त्वर्थः यथेच्छ्यासीत

आरब्धे कुरुध्वमित्यादि सत्कारपूर्वक इति अध्ययनादिव्यापारविषयकसं
माननपूर्वक श्रद्धानक्रमलोव्यापार इत्यर्थः यथा माणवकमध्यापयेदि।
ति अनकूलनवेचोक्तव्यापारेषु प्रवृत्तिजनकतावच्छेदकत्वमेव बोध्यम एत
चतुष्टयेति उक्तस्वरूपविध्यादिचतुष्टयेत्यर्थः लाघवादिति तस्य शाक्यता
वच्छेदकत्वकल्पने लाघवादित्यर्थः सर्वोक्तस्थलेषु विध्यादीनां बोध्यस्य सर्वे।
मिष्टत्वेपि तत्तद्रूपाणां लिङादिशक्यतावच्छेदकत्वे गौरवाल्लाघवात्तावत्सा
धारणप्रवर्तनात्वेनैव तद्बोध इति भावः तत्रसम्मतिमाह उक्तंचेति तत्रैवे
ति तद्धर्मावच्छिन्नपवेत्यर्थः किंभेदस्येति तत्तद्रूपविशेषस्येत्यर्थः तत्तद्रूपे
णाबोधानपेक्षादादिति भावः नहि विशेषरूपेणासन्नेतदुपादानं किमिति
कृतमत आह न्यायेति न्यायः शक्तिस्तद्बुध्यारनार्थं तदुद्धारायेत्यर्थः प्रवर्तना
त्वे विध्यादि प्रवर्तन इति बोधनार्थमिति यावत् ननु प्रकरणादिना तत्रैव श
क्तिग्रहो भविष्यतीत्यत आह प्रपंचार्थमिति प्रवर्तनाप्रवृत्तिक[illegible]णामिति।

ल॰
टि॰
६८

सुत्वत्वाग्रहे तेनैव नातु विनिष्पन्नप्रवर्तनाया ग्रहात्मसत्वेन नकृतव्यापारत्वाभावम
भिप्रेत्याह प्रवर्तनात्वे चेति विषयतावच्छेदकत्वमिति ज्ञाननिष्ठप्रकारतानिरूपित।
कत्वायोग्यकालिकत्वावच्छेदकत्वमिति भावः तच्चेति निरुक्तावच्छेदकत्वं चे
त्यर्थः तदेवेति इष्टसाधनमेवेत्यर्थः एवकारेणापराभिमतकृतिसाध्यत्वा
दिव्यवच्छेदः तत्रेष्टत्वेन समभिव्याहृतपदोपस्थितकामनाविषयत्वं तच्च
स्वर्गकामो यजेतेत्यादौ स्वर्गादिषु तत्समते नैव च स्वर्गादीनामनुगमः यदि।
चेष्टतावच्छेदकरूपावच्छिन्ननिरूपितसाधनताज्ञानस्य लोके प्रवर्तकत्व।
दर्शनात्तेन रूपेण स्वर्गादिज्ञानं विना विधिवाक्यात्कथं प्रवर्तकत्वानिर्वा
ह इति विभाव्यते तदेष्टतावच्छेदकत्वोपलक्षणेन स्वर्गादीननुगमय्य तद
वच्छिन्नसाधनत्वेन स्वर्गादिसाधनत्वेश ज्ञेयोगीकार्यतेन प्रवर्तकत्वानानु
पपत्तिः ``````` च्छिन्नसाधनतायाश्च स्वमप्यबोधनेन समालिङ्गादिना।
बोधयितुं शक्यत्वाद्यजेपयजेत स्वर्गादिव्याहृतेनैवेनात्यस्य च प्रागनपस्थि

स्यादृष्टविशिष्टसाधनत्वेन शक्तिग्रहासंभवाच्चेति वाच्यम् स्वर्गत्वाश्रयत्वं किंचि
द्व्यक्तिनिष्ठाभावप्रतियोगितद्रूपस्वर्गसाधनत्वमेव प्रथमतोवगम्यते प्रा
थवा यागानन्तरकालावृत्तित्वं स्वर्ग इति नोक्तदोषः तस्मान्नन्यथासिद्धत्वेन
विधेः प्रवृत्तितात्पर्यकत्वाद्यथा यागाद्युत्तरकालग्राह्यम् एवं नित्यश्राद्धस
न्ध्यादावर्थवादिकफलकल्पनात्तेष्टसाधनत्वस्य द्वयादृष्टद्वारकः श्राद्धमहर
हः संध्यामुपासीतेत्यादौ विध्यर्थेन बाधकत्वाद्यन्नागमप्रपवितम् यातदर्थवा
पारगतेष्टसाधनत्वस्याख्यातेनाभिधानेपि ज्योतिष्टोमनामकत्वाद्रूपफ।
लगतस्य तस्यानभिधानाद्यागसमानाधिकरणज्योतिष्टोमादिपदान्नती।
यान्वयपत्तिः न कलञ्जं भक्षयेदित्यादौ कलञ्जभक्षणकर्मकव्यापाराभावे वृत्ती।
तेन तत्स्वप्रतियोगिनि लक्षणा सैषाधिका निष्टसाधनत्वालेपात्तदिये नं वर्तन्ते करो।
पपत्तिरिति भावः नैयायिकास्तु कृतसाध्यप्रवृत्तिवारणाय कृतिसाध्यत्वा
ज्ञानमेवं मधुविषसंपृक्ताद्भोजनेन तद्वारणाय बलवदनिष्टासाधनत्वज्ञाने

ले॰ इ॰ ९९

69

वश्यकत्वैकारणमिति प्रवर्तकज्ञानविषयतावच्छेदकत्वानयोरपि विध्यर्थत्व
मानमिति तन्मते क्रमेणाह इष्टेपि तत्साधकते २ यद्यप्येतत्कृतिसाध्यत्वस्या
पि तज्ज्ञानस्यापि प्रवर्तकत्वम् तथापि यागादौ सर्वत्र न लोकत एवावगम्यते।
इत्यन्यलभ्यत्वान्न तल्लक्षकं १ एतन्मते त्वनुकूलज्ञानविषयितावच्छेदकत्वम्
तत्र हेतुमाह तज्ज्ञानस्येति कृतिसाध्येपि तज्ज्ञानान्प्रवृत्तिदर्शनादिति भावः इ
ष्यत इति तथापीति लोकादेवेति यागो मत्कृतिसाध्यो मत्कृतिव्यतिरेकप्र
युक्तव्यतिरेकप्रतियोगित्वात् मत्कृतिसाध्यपाकवदित्याद्यनुमानादित्यर्थः।
तत्कृतिसाध्यत्वेष्टसाधनत्वमिति श्रुतत्वलभ्यो लिङ्गर्थ इति न्यायादिति भावः २ बल
वदनिष्टाननुबन्धित्वज्ञानेन च तद्धेतुः द्वेषाभावेनान्यथासिद्धत्वात् श्रा[illegible]ति
ककामकस्य नरकसाधनताद्दशायामपि स्त्रकोटेच्छया द्वेषाभावदशायां प्रव
त्तेर्व्यभिचाराच्च तस्मादिष्टसाधनत्वमेव प्रवर्तनात्वम् उक्तं च मण्डनमिश्रैः पुंसां
नेष्टाभ्युपायत्वात्क्रियास्वन्यः प्रवर्तकः प्रवृत्तिहेतुं धर्मं च प्रवदन्ति प्रवर्तनाम्।

मिति शेषं विवेचितं चैतद्याकरणभूषणे १ बलवदनिष्टाननुबन्धित्वस्यापि प्रवर्त
कज्ञानाविषयत्वान्नत्वेन रूपापत्तमेवेत्याह बलवदिति नेष्टत्वादिति न प्रवर्त।
कमित्यर्थः तस्यतत्त्वे हेतुमाह द्वेषाभावेनेति ~~बलवदनिष्टाननुबन्धिकामित्यर्थः~~
~~[illegible]~~ ~~[illegible]~~ मधुविषसंपृक्तान्नभोजने द्वेष साधनता
ज्ञानेनान्यद्वेषविषये प्रवृत्त्यापत्तिवारणाय तद्विषयकप्रवृत्तिं तद्विषयकद्वे
षाभावस्य प्रतिबन्धकाभावविधयावश्यकत्वम् नियतपूर्ववर्तिताकस्येदं त।
तथैवोपपत्तौ न बलवदनिष्टाननुबन्धित्वज्ञानस्य तत्तेनान्यथासिद्धत्वादित्य
र्थः ननु अन्वयव्यतिरेकसहचारयोः कारणताग्राहकयोरविशेषादिति गम
नाविरहादुभयोरेव हेतुतास्त्विगत आह ग्राह्लिकेति परलोकानभ्युपगन्तुः ३
नेकसाधनताज्ञानासंभवात्परलोकस्वीकर्त्रर्थकामालिकेस्मकम् तस्य
नरकसाधनताज्ञानानन्तरं द्वेषाबाधाभावादाह कामुकस्येति तत्तेवोक्तं
रागवत्त्वं रागेणोक्तत्वं ज्ञानविशेषो विषयिताविशेषो वा ग्राह्य इति यस्या

गम्यागमनइत्यादि द्वेषाभावदशायामितिद्वेषसामग्रीवैकल्यंदर्शितम् नच।
विषयतयाद्वेषप्रसक्तेरिच्छासामग्रीविरहविशिष्टद्विष्टसाधनताज्ञानस्यद्वे
षतयाताद्दशासामग्र्याःस्वातंत्र्येणप्रतिबंधकतयावाबाध्यम् व्यभिचारेष्विति
तथाचव्यतिरेकव्यभिचारान्नतस्यप्रवृत्तिकारणत्वमितिभावः उपसंहरति तस्मा
दिति इष्टसाधनत्वमेवेत्येवकारेणकृतिसाध्यत्वबलवदनिष्टाननुबंधित्व
योर्व्यवच्छेदः स्वायम्भलौकिकप्रमाणेनैवावगमादेतस्यप्रवर्तकज्ञानावि
षयत्वाज्ञानत्वमितिभावः प्रवर्तनमितिविध्यर्थइत्यर्थः इष्टाभ्युपायत्वादिति
इष्टसाधनत्वादिक्रियायस्ययागादिरूपायाइष्टसाधनत्वेप्रवर्तकज्ञाननिष्टप्रवृत्तिज।
नकतायांविषयतयावच्छेदकोनान्यएवसमर्प्यतेनेतिवाक्यान्तर्गतलिङादिश
ब्देनेत्यर्थः किंत्विष्टसाधनत्वमेवतथेतिभावः चोदनैवायतः प्रवृत्तिहेतुत्वेप्रवृत्ति
हेतुतावच्छेदकंधर्ममेवप्रवर्तनात्वेनकथयतीत्यर्थः ननुयद्वेदवाक्यमेवविध्य
र्थंतएवप्रवर्त्तकमदृष्टस्यवानिष्फलंसंध्यावंदनादौप्रवृत्तिरूपपद्यतइतिवदंति।

भोदृष्टशाब्दीभावनाविपर्ययः तयाचार्थीभावनास्वर्गोत्पादनलक्षणाभाव्या।
ततस्याहुः आचार्यास्तामाभिप्रायोविपर्ययेणेनचस्वविषयरूपसाधनतान्।
मानात्रिपोऽन्यस्यप्रवृत्तिनिर्वाहः नवीनाःपुनर्लिङादिशब्दप्रयोगरूपाश्च।
णोवलिरूर्थः श्रवणात्तेनतस्याः स्वविषयत्वमपितयाचस्वविषयेयागादिवि
शिष्टसाधनतानमानात्प्रवृत्त्युपपत्तिविप्याममेनेति तत्कथमिष्टसाधनत्वमे
वप्रवर्तनेत्यतआह शब्देचितेचैतदितिपतदिष्टसाधनत्वस्यविपर्ययेनचया
रणामन्येषांविपर्ययेननिराकरणंचेत्यर्थः शब्देचितेविस्तरेणप्रतिपादितमि
त्यर्थः शेषदृष्टत्वभियानत्वाच्चोक्तमितिभावः दर्पणोविस्फुटोयमर्थोनिरस्ता।
सुनाततोप्यवधार्यइति २ आदिनारूपत्वरूपत्वमतोलिङ् आदिषिलिङोदावि
तिस्तत्त्वोक्तारूपत्वरूपत्वमभावार्थयोगृह्यते योज्ञाप्तगणपानानुवृत्तेप्रानेनयात।
नेयदितियया १ आदिनेतिप्रेरणादौचेत्यज्ञापनेनादिपदेनेत्यर्थः उपरव।
णमाह योज्ञाप्तगणपानगवेदिति यत्करेकोज्ञाप्तणोरणाकोयधोयमप्तन्

ल॰ ह॰ ११

71

मिकानां दृश्यवयोग्यमनद्यातनवार्षिकीयातने निबोधः हेतुहेतुमतोर्लिङ्गि
नेनयोरनयोः कार्यकारणभावे लिङ्विधानात्प्रवर्तकत्वेन विनाविधेः श्रमा।
त्पायातस्यानिहन्तिपरत्वश्रहेतस्याज्ञावगतित्वमिति विधिः कल्प्यत इति भावः
लुङ्गेयमाह भूतमात्र इति भूतसामान्य इत्यर्थः भूत इत्यपि कृत्यलुङिति स्व
शात् अत्र विद्यमानध्वंसप्रतियोगित्वं भूतत्वम् तच्च क्रियायां निर्धार्यमिति।
घटे॰ विद्यमानेपि घटो भूदिति प्रयोगः विद्यमानध्वंसप्रतियोगी यदा भिन्नाश्रय
क उत्पत्त्याद्यनुकूलो व्यापार इति बोध्यः १ भूतमात्र इति मूले मात्रपदं कृ
त्स्नार्थकमित्यभिप्रेत्य व्याचष्टे भूतसामान्य इति तेन विशेषविवक्षायां ल
ङादीनामवसरो ध्वन्यते भूते लुङ्गीति भूत इत्यपि कृत्यलुङिति सूत्रादि
त्यर्थः अत्रेति भूत इति सूत्र इत्यर्थः क्रियायामिति धात्वर्थव्यापार इत्यर्थः न
चैवमलानवयवस्य एवं समर्थितत्वादिति भावः नैयायिकानां भावना
त्वं निमित्ताम्नायवकालान्वयाभ्युपगमेन तत्र इस्य विद्यमाननादृश्यो

११

व्यापारविगमेपाचि देवदत्ते नेत्यादिश्योगानुरोधेनोत्पत्तिं चरितेत लक्षणभ्र।
ष्येत्रितिगौरवमितिभावः नैयायिकास्तुनाशवाहूरादीनामनुत्पत्तिं चरितेम
नत्वएवपाक्रिरकर्मककधात्वनोव्यापारमात्रार्थकत्वात्सत्नोमपायति विके।
व्यापारस्यतत्तोनन्नुभवाच्च एवंचयत्रोत्पत्तिरूपोपायत्रघो व्यापारस्तत्रनोत्प।
त्तेर्दृयाभावापत्तिर्नष्टपत्यादिश्यलेनत्पत्तिंचरितेतत्सिल्लक्षणैयेवतिर्वाह
इत्याहुः २ अथमत्रसंग्रहः कालोद्विविधः अद्यतनोनद्यतनश्च आद्योद्विवि
धः भूतभविष्यद्वर्तमानभेदात अंत्योद्विविधः भूतोभविष्यश्चतत्रवर्तमाना
त्वेलट् भूतत्वमात्रेलुङ् भविष्यतामात्रेलृट् हेतुहेतुमद्भावाधिकार्येविवक्षा
यामनयोर्लृङ् अनद्यतनेभूतेनन विवक्षितेलङ् तत्रैवपरोक्षत्वविवक्षायां
लिट् नाद्योभविष्यतिलुट् इतिद्रष्टव्यः १ सत्रविपर्ययविभागेहस्तबोधा।
याह अद्यमितिपर्यवसितोर्थेइत्यर्थः द्विविधइति अनद्यतनेवसानत्वाक्षेम
वादितिभावः तत्रैवेति अनद्यतनएवेत्यर्थः नाद्यइतिअनद्यतनइत्यर्थः।

धा॰

लृ॰ दृ॰ ७२

72

लृङमाह सत्यामिति क्रियायाश्चातिपत्तिरनिष्पत्तिस्तस्यां गम्यमानायां भूते।
भाविनि हेतुहेतुमद्भावे सति लृङित्यर्थः लिङ्निमित्ते लृङ् क्रियातिपत्ताविति सू
त्रात् लिङो निमित्ते हेतुहेतुमद्भावादौ यथा सुवृष्टिश्चेदभविष्यत्सुभिक्षम
भविष्यत् वह्निश्चेत्प्राज्वलिष्यदोदनमपक्ष्यदित्यादौ अत्र वक्ष्यमाणभिन्नाश्रय
कविज्ञिप्त्यनुकूलव्यापाराभाव इति शाब्दबोधः इति रीत्या इष्टव्यम् निष्पत्ति
रितिश्चनभिनिर्वृत्तिरित्यर्थः सा च लृङा द्योत्यते वक्तृप्रमाणान्तरेणा
मवगम्य लृङ्प्रयुङ्क्ते भूते भाविनी त्वस्याविवक्षणे हेतुमद्भावे सतीति केचित्
वक्तृतवक्तृतयोर्लिङिति भूतभविष्यतोर्लृङ् स्यादनागभिहितमेवाह।
वाऽभूते भाविनीति तच्च धातुकलपदेयार्थव्यापारविशेषणम् लिङ्
निमित्तं तत्र हेतुहेतुमद्भावे सतीत्यर्थकथनम् तत्राभसायावरणमुदा
हरणमाह सुवृष्टिश्चेदिति अत्र कथमेव यथान्वयं स्यकार्यभेदेऽभिन्न स्यकार
णाभावः उत्पन्नत्वस्वोभिन्नयोस्तयोः सहति विरोधः प्रयोज्यत्वेति विज्ञेयम्।

मू॰

हेतु॰

७२

नकूलव्यापाराभावान्वयिनिनववह्निपवनलनौदनपाकयोः कार्यकार।
णभावावगमः यदभावेयदभावप्रयोज्यः सतज्जन्यइतिनियमात् केवल।
भूतेतत्परिनिर्वीणेन्नविवक्षितमभविष्यत्तदानेतिनंतीत्येवावक्ष्यदिति।
गोडपादीयभाष्यस्यमहाव्याहरणम् परस्परेणास्वहननीयपोर्मेनवेदिदं
ह्मयोजनयिष्यत् इतिरचुर्वेषांस्येवतद्वोध्यमित्याहुएवंरीमेति २ अर्थंचा
र्थनिर्देशउपलक्षणम् अर्थांतरेऽपिविक्षणोविधानदर्शनात् प्रसिद्धत्वा।
देवार्थेऽकाक्रिरत्नइलक्षणेनिमतांनवर्त्तीत्याचोक्तम् एतेषांक्रमनिया

फ मस्थानेऽपक्रमएवपंचमलकारइत्यनेनमीमांसकैर्लेट् व्यवस्थितइति
दिक् ॥ इतिश्रीवैयाकरणभूषणसारेलकारविशेषार्थनिरूपणम्
२ ॥ अर्थेचेतिवर्तमानेपरोक्षइतिप्रदर्शितस्यार्थः उपलक्षणमितितेना
नद्यतनार्थलक्षणपार्थांनरस्यापिक्रोडीकरणादितिभावः तदेवाहार्थो।
तेऽपीतिअर्हार्थक्रियामकालाद्यर्थेऽपीत्यर्थः एषुवर्तमानाद्यर्थेषुशक्ति।

ल.द.
७३

बोधकतान्वयान्यत्रसर्वैलक्षणोक्ष्यातेबोधे कर्तृशक्तत्वेशक्तिविनिवारितो
मतेलक्षणायाः शक्त्यनतिरेका छकालसख्यव्यवहारस्यप्रसिद्ध्यप्रसिद्धिरिति।
बंधनतस्त्रीकारादित्यभिप्रेत्यप्रसिद्धत्वादित्यभिहितम मतानवरीत्याचेति।
शक्तिः संकेतरूपापदार्थोतरान्वयावैनेषवान्यत्रनदसंभवाल्लक्षणैवेति।
मतानवरीनित्यायाचेत्यर्थः अनुबंधकमश्नतिदज्ञानंबंधसहकृताकार
अनुबंधकमस्त्यर्थः तेनाकारेणनुबंधसाम्येपिनलङः प्रथमतमित्याभाये
नाहारिति ॥ इतिभूषणसारलघुदर्पणेलकारविशेषार्थनिरूपणम् २
श्रीगणेशायनमः अथसर्वेसंगत्यानिरूपणेपिसर्वेषामर्थप्रातिपदिका।
र्थविशेषत्वात्तावर्थाकांक्षितत्वाच्चादौकारकविभक्त्यर्थनिरूपणमित्य
भिप्रेत्याह सुबर्थमिति १ सुबर्थमाह आश्रयोवधिरुद्देश्यःसंबंधःशक्ति
देवता यथायथंविभक्त्यर्थाःसुपांकर्मेतिभाष्यतः द्वितीयातृतीयासप्त
मीनामाश्रयोर्थः तथाहि कर्मणिद्वितीया तत्रकर्तुरीप्सिततमंक्रियान ७३

न्यफलाश्रयस्त्वर्थः क्रियाजन्यफलाश्रयत्वेनकर्मणएवकर्तुरीप्सिततम
त्वात् तथायुक्तंचानीप्सितमित्यादिसंग्रहाच्चैवमेवयुक्तम् ईप्सितानीप्सि
तत्वयोःशाब्दबोधेमानाभावेनसंज्ञायामेवतदुपयोगेनतद्वाच्यकोटौन।
प्रवेशः तथाचक्रियायाःफलस्यचधातुनैवलाभात्तज्जन्यत्वस्याश्रयत्वा
र्थः तत्वंचावच्छेद्यत्वनिरूपमवच्छेदकम् अतएवमुक्तेनप्रथमार्थोनिरूपि
तोकारकत्वादितिभावः आश्रयार्थइति साक्षात्सम्बन्धेनवाधात्वर्थः
निरूपिताश्रयतावानित्यर्थः परम्परयाकर्तृत्वकर्मत्वादिनाश्रयत्वेननाति
प्रसंगः तत्रद्वितीयायाआश्रयार्थकत्वेमानंग्राहयतितथाहीत्यादिनाक
र्तुरीप्सिततममित्यनेनशाब्दमर्यादयाकर्तृनिष्ठेच्छाविषयत्वविशिष्टस्यै
वकर्मत्वंप्रतिपाद्यतेतेनतत्क्रियाजन्यफलाश्रयस्यैतन्नाह क्रियाजन्येति अ
यंभावः सूत्रे ईप्सिततमपदंप्राप्नोतेरिच्छासन्नन्तात्कर्मणिक्तेनाप्यकृत्यर्थो
तिशयार्थकेनतमपानिष्पन्नंतस्ययोगार्थश्चकर्तृशाब्दात्तस्यचवर्तमानइतिष

ल॰ द॰ ७५

75

ष्टीकर्त्ता। तथाकर्त्तोपस्थितत्वात्स्वीयव्यापारेणाव्यवहितप्रागभावमेव्या।
पारजन्यफलसंबंधित्वप्रकारककर्तृनिष्ठेच्छाविषयः कर्मत्वमर्थः एवं
सतानात्क्रियाजन्यफलाश्रयस्य कर्मतालाभो व्यापारान्वयकर्मणः सत्त्वेतथात्व
र्थेनोपसंगृहीतत्वेपि कर्त्तृनिकर्मणोः संग्रहाय ज्ञाकर्मकत्वमिति नतथा।
पीच्छाविषयत्वं तत्वेतु कर्मताप्रतीतिर्न तदवच्छित्सतस्तस्यानत्याह तथायुक्त
मिति इच्छाविषयत्वमेवार्थः न तत्कर्तृपक्षेवहितीयार्थत्वेतदर्थविभक्तीत्या
तोहस्यादेरीप्सिततमत्वेनशाब्दभानानुपपत्तिरत आह ईप्सितानीप्सित
त्वयोरिति मानाभावेनेति तथाप्यन्यथासिद्धत्वेनावभवागोचरत्वादि
तिभावः संज्ञायामेवेति प्रथमाशयः क्रियाजन्यफलाश्रयः कर्मेति सूत्र
प्रणयनेप्यस्य विशेषणेप्सितानीप्सितयोः कर्मसंज्ञासिद्ध्यतित्याप्य।
पवेभ्यो गोवायत्नीत्यादौ क्रियाजन्यफलभागित्वेपद्वायायोरपि विशेषवि
द्धिनैवार्थानामित्यपादानत्वेप्रसक्तेन कर्मसंज्ञानत्तद्विभक्तीत्यादै

तद्योगे च विनार्थ्यांतमभिव्याप्ययोग्यमिति तन्मतस्य सत्तिकोटौ निवेशो द्रष्टव्यो दा।
सीनयोरप्रामाणे विधाने मतस्य सत्त्रस्याप्यावश्यकत्वेति तत्रतावता सत्रादि
शिष्टाश्रयस्य द्वितीयार्थतानवधानाश्रयमात्रस्यैव तत्राह तथा चेति आश्रय
एवेति एवकारेण विशिष्टाश्रयस्य तन्नव्यवच्छेदः तत्राश्रयस्य द्वितीयार्थत्वे आ
श्रयत्वस्य धात्वर्थतावच्छेदकत्वं वाच्यं तच्च न संभवति निरूपकभेदभिन्नाश्रयत्वस्या
नुगततया भावादत आह तत्त्वे चेति कर्मसंज्ञेत्यर्थः २ गौरवे पचतीत्यत्र विक्लि
त्याश्रयत्वात् कर्मतापत्तेः करोतीत्यत्र तन्याश्रयत्वात् उत्पत्तेर्धात्वर्थत्वात् ना।
नातीत्यत्र वरणभंगादुरूपज्ञाया धात्वर्थफलाश्रयत्वात् अतीतानागतादिपरित्य।
ग्य ले पितानन्यस्यत्वस्यावश्यकत्वात् अन्यथा सर्वं जानातीत्यनापत्तेः अती
तादेराश्रयतावच्छेदकविषयतया ज्ञानाश्रयत्वाद्यौगिकानाम्भिव्यासत्वार्थवादसि
द्धान्तादेरपपद्यते उक्तं च तिरोभावाभ्युपगमे भावानां सैव नास्तिता लब्धरू
पे तिरोभावे वद्यतीति प्रतीयते तन्न कुमारेणत्वमात्रार्थकत्वा कर्मत्वापत्तेः

फलत्वमतआह उत्पन्नेविति नयावत्कुत्रोकर्मकत्वापत्तेविनेनतस्याः फल
त्वमव्यवस्थापितत्वादुक्तदोषः कर्मत्वानुपपत्तिरस्मन्मतेयत्रमात्रार्थकत्ववादि
नांत्यस्यास्त्येवेत्यदोषइतिभावः आवरणाभंगेति प्राचीनमतानुरोधेनेदं निष्कृष्ट
मतेतुज्ञानरूपफलस्यविषयतयाघटादौसत्वात्तदुपपत्तिर्बोध्या नचाकर्म
कत्वापत्तिः फलत्वावच्छेदकविषयतासंबंधघटितसामानाधिकरण्यस्यतद
र्थत्वात्प्रकृतेसत्वादितिबोध्यम् ननुविद्यमानघटेज्ञानजन्यावरणाभंगस्यसंभवे
पिभाविविनष्टघटस्थलेघटंजानातीतिप्रयोगानुपपत्तिः तादृशघटस्यावर
णाभंगाश्रयतायांमानाभावादतआह अतीतानागतेति अवच्छेदकत्वेनपु
ष्किमाह अन्यथेतितादृशघटेआवरणाभंगास्वीकारसमर्थः यथाश्रुतेवमिति
इदानीमतीतेपितद्घटेविद्यमानतादशायांतात्कालिकज्ञानेनावरणा
भंगजननदशायांत्वाधुनिकज्ञानेनतस्मिन्घटेजननेनैवज्ञानातिक्र।
मस्यस्फुटत्वात्सर्वज्ञानानतिक्रांतत्वाभावरूपविषयस्याबाधात्तदानी

ताद्दृश्यज्ञानानोबाधात्तत्तदापत्तिरितिभावः ननुविनष्टघटेवास्तवतदाश्र
यत्वैवकथमतआह प्रतीतादेरिति नैयायिकानामिवेति यथानुभवानुरो
धेनतत्तज्ज्ञानाश्रयफलाभ्युपगमस्तथातथाममापीतिभावः ननुतीतेघटे
ज्ञानविषयइति विषयतोल्लेखिप्रतीतेरस्तुनत्वतदाश्रयत्वे घटेस्यादतइति।
प्रतीतेराविर्भावानभ्युपगमेवक्तव्यमत्रतदाश्रयत्वेनत्वतआह सत्कार्येति न
ष्टस्यचघटस्यैवसाम्प्रतमितिक्रमाकार्यस्यकारणेस्वस्वरूपेणसत्वबोधनेनस्व
स्वरूपेणसत्त्वेवहारेणानाविर्भावाभ्युपगमेनतानुपपत्तिरितिभावः ननुसर्व।
देवसत्त्वेतस्मिन्कथंनास्तिनष्टइतीतिव्यवहारविषयत्वमतःसांख्यसम।
तोतदुपपत्तिमाह उक्तेचेति तिरोभावाभ्युपगमइति तिरोभावाभिव्यंज।
कसामग्र्यभावावातिरोभावेभिव्यंजितेसतिभिव्यक्ततिरोभावएवनास्ती।
तिव्यवहारविषयः अनभिव्यक्तेसामग्रीकालिकेतत्तस्मिन्नष्टइतीतिव्यवहा
रविषयत्वेनत्यर्थः २ ननुचैत्रोग्रामंगच्छतीत्यत्रग्रामस्यैवचैत्रस्यापिक्रियाज।

न्यग्रामसंयोगरूपफलाश्रयत्वात्कर्मत्वापत्तौ चैत्रश्चैत्रं गच्छतीत्यापत्तिः प्रयागात्
काशीं गच्छति चैत्रे प्रयागं गच्छतीत्यापत्तिश्च क्रियाजन्यसंयोगस्य काश्यामिव वि
भागस्य प्रयागेपि सत्वादिति चैत्रग्रामस्येव चैत्रस्यापि फलाश्रयत्वेपि तदीयक
र्तृसंज्ञया कर्मसंज्ञाया बाधेन चैत्रश्चैत्रमिति प्रयोगासंभवात् द्वितीयान्त्ये सं
ज्ञाया एव नियामकत्वात् अन्यथा ग्रामयति क्रमसंयोगफलमित्येव पाचयति
क्रमसे नेत्यत्रापि क्रमसंपदाद् द्वितीयापत्तेः १ कर्मण्याख्यातस्याद्यौपयिके लक्षण
या क्रमाणे कृते नन्विति ननु कर्मसंज्ञायाः कर्तृसंज्ञया बाधनेपि वाक्यक
र्मत्वस्य तत्राबाध्यत्वात्स्यादेव तादृशः प्रयोग इति आह द्वितीयोत्पत्ताविति सं
ज्ञाया एवेति कर्मसंज्ञाया एवेत्यर्थः अन्यथेति उक्तसंज्ञया अनियामकत्वे इति
उक्तां चैत्रकर्मत्वस्य नियामकत्वे चेत्यर्थः द्वितीयापत्तेरिति णिजन्तयात्वर्थव्या
पारजन्यपचधात्वर्थव्यापारजन्यफलाश्रयत्वात्तत्कर्मत्वस्य क्रमस्य समभिव्याहारादापत्तेः
मन्मतेन कर्तृसंज्ञया कर्मसंज्ञाया बाधात्तत्र दापत्तिरिति भावः २ णावेवाथ

चैत्रश्चैत्रमित्यत्र स्यादितिचेन्न तथाप्युपस्थानानामिष्टापत्तेः उच्यतां वा शब्दकारता
संबंधेन धात्वर्थफलविशेष्यकबोधं प्रति धात्वर्थव्यापारानधिकरणाश्रयो-
पस्थितिर्हेतुरिति कार्यकारणभावोत्तम प्रकृते चैत्रस्य व्यापारानधिकर-
णाभावान्न दोषः प्रयोगस्य कर्मत्वेन संभावितमपि न समभिव्याहृतधात्वर्थ-
फलशालित्वस्य वक्तिपानमेतत्तेन न विवक्षणस्यानुकप्रायत्वात् १ शाब्दबोध
इति चैत्रनिष्ठसंयोगानुकूलचैत्रकर्तृकचैत्रं गच्छतीत्यतः स्यादित्यर्थः तथेति
सामान्यतो धात्वर्थफलविशेष्यतानिरूपितप्रकारतासंबंधेन बोधे प्राश्रयो-
पस्थितेर्विशेष्यतासंबंधेन हेतुत्वविवादिनामित्यर्थः बोधस्यपुत्पन्नसावित्वा-
दिति भावः चैत्रैश्चैत्रं गच्छतीत्यत्र तादृशबोधानुभवादाह उच्यतां वेति
कार्यकारणभावान्तरमिति शाश्रयधात्वर्थव्यापारानधिकरणत्वेन विशेष्य-
तादृशाश्रयोपस्थितिर्हेतुरित्याकारकमित्यर्थः समभिव्याहृतेति तत्प्रयो-
गान्तर्गतेत्यर्थः विवक्षणास्यानस्य विक्तित्याश्रयत्वात्कर्मतेत्यादिनेति शेषः

गमेस्त्वत्रानुपपन्नात्कर्माश्रयत्वादिति तथाच कर्तृगतप्रकृत्यर्थव्यापारप्र
योज्यत्वघटितकरणप्रकृत्यर्थफलाश्रयत्वं यावत्कर्मानुगतं कर्मत्वं लक्षण
मित्यर्थः अग्नेर्माणवकं वारयतीत्यत्र संयोगानुकूलव्यापाराभावान्नुकूला
व्यापारार्थकवारयत्यर्थाग्निसंयोगानुकूलव्यापारवत्तोऽग्नेर्वारणायव्यापा
रे कर्तृत्वविशेषणे चैत्रो ग्रामं गच्छतीत्यादौ चैत्रेऽग्नेर्वारणायव्यापारेऽपि
कत्वापि तथा माषेष्वश्वं वारयतीत्यत्राश्वं स्वप्रयोज्यभक्षणाश्रयमाषाणां तत्त्व
वारणायप्रकृत्यर्थत्वे फलविशेषणम् पयसा भुङ्क्त इत्यत्र च पयस उक्ता
कर्मत्वेऽपि न तद्विवक्षणात् द्वितीयेति बोध्यम् नैयायिकमतं दूषयितुमुपन्य
स्यति २ नैयायिकोक्ताद्यदोषवारणाय परसमवेतत्वम् द्वितीयदोषवा
रणाय धात्वर्थतावच्छेदकतत्फलविशेषणं द्वितीयावाच्यमुपादत्ते परसम
वेतत्वे धात्वर्थक्रियायामन्वेति नैवं कार्यकारणभावान्तरकल्पनात् धात्व
र्थमपि द्वितीयया स्वप्रकृत्यर्थापेक्षया बोध्यते तथाच चैत्रस्तण्डुलं पचतीत्यादौ

तण्डुलान्यसमवेतव्यापारजन्यधात्वर्थतावच्छेदकविक्लित्तिशालित्वात्तण्डुला।
नां कर्मता धात्वर्थबोधस्तत्तण्डुलसमवेतधात्वर्थतावच्छेदकविक्लित्त्यनुकूलतण्डु
लान्यसमवेतक्रियाजनककृतिमांश्चैत्र इत्याकारः। अथ यदोषेति चैत्रश्चैत्रं गच्छ।
तीति प्रयोगापत्तिरूपेऽन्यर्थेन वादिमतेनेदम्। ननु परसमवेतत्वस्य कुतो लाभो
नत्राह द्वितीयावाच्यमिति फलावच्छिन्नव्यापारस्य धात्वर्थवादिमतेनेदम्। न
नु परसमवेतत्वस्य कुतो लाभो नत्राह द्वितीयावाच्यमिति तच्छक्यमित्यर्थः। ना।
न्यपरसमवेतत्वे चेति न च द्वितीयार्थप्रकारकबोधहेतोः फलतावच्छिन्नवि।
शेष्यतासम्बन्धेन धात्वर्थोपस्थितेः क्रियायामसत्त्वात्कथं तन्न्यायात आह तथे।
वेति नेदृशान्वयगोऽन्यर्थः। कार्यकारणभावो नेति द्वितीयार्थपरसमवेतत्वा।
प्रकारकशाब्दबोधे भावनानावच्छिन्नविशेष्यतासम्बन्धेन धात्वर्थजन्योपस्थितेर्हे
तुत्वात्तत्र कल्पनादित्यर्थः। ननु भेदत्वेन भेदस्यैव लाभान्वयितया सर्वस्यैव प
रत्वेन चैत्रक्रियाया अपि मैत्रान्यसमवेतत्वात्तद्वाच्यताङ्गीकारेण कृतदोषस्तथा।

न॰ टी॰ ७८

प्रकृत्यर्थान्वयोपगमाद्धैत्रसंयोगजनकचैत्रक्रियायां चैत्रभिन्नसमवेतत्वाभावा
च्चैत्रं चैत्रो गच्छतीति प्रयोगापत्तिः अन्यत्वाभेदप्रतियोगितावच्छेदकत्वेसमवक्रि
यान्वयि द्वितीयार्थः भेदश्च प्रकृत्यर्थस्याधेयतयान्वयः एवं च मल्लो मल्लं गच्छ।
तीत्यस्यापि सामंजस्येन पंचमा ममापीति भावः ननु नीलो घटो ज्ञानविषय इति। न॰
विषयत्वे द्वितीयाप्रतीतेर्नत्वनस्य तदाश्रयत्वे च यो ज्ञात इति प्रतीतेर्न्नेत्यावरणाभे
गानुलोमाकथनेन ज्ञतदाश्रयत्वेनस्य तथाह तदुपपत्तिन समभिव्याहारेण।
ज्ञानार्थस्य वशात्क्वचिद्द्वितीया प्रकृत्यर्थवृत्तित्वविशिष्टभेदप्रतियोगितावच्छे
दकत्वाभावः क्वचिच्च द्वितीयार्थान्तरस्य तित्वविशिष्टसंयोगजनकत्वाभावो।
धात्वर्थक्रियांप्रत्याययत इति भावः विक्लित्तिं तण्डुलान्यसमवेतक्रियान्वयि।
यथा पक्वते स्थपति तत्रैवयामेद परसमवेतत्वादेर्गौणत्वेनाव्याप्यत्वात्
यत्र प्रसंगः किं द्वितीयायाः शाब्दबोधस्य वा नाद्यः तावद्वाच्यकथनेपि तत्ताद
स्यालगमयतिकृष्णं गोकुलमिति वत्याचयतिकृष्णं गोपस्त्यापत्तेः तंडुलेषु।

७८

वतिचेत्तर्हि वर्तनेऽनेपचाने स्वयमेव मा प्रसाङ्क्षीत् विक्लित्यनुकूलनेऽनाममम।
वेताग्निसंयोगरूपयावर्थो ग्रहणात् शङ्कैवायातिप्रसंगो युक्तरीत्यैव निरस्तः
ननु प्रामाणिके गौरवे न दोषाय इत्यत आह अतिप्रसंगः किमिति नावधारितः
एवमेव तथा तदर्थतावच्छेदकफलाश्रयत्वस्य द्वितीयार्थत्वं सकर्मकेपि द्विती।
यातिप्रसंगस्य तादवस्थ्यादित्यर्थः तेनैव गम्यतिक्रमसमित्यादिना द्विती
यापत्तेरिति द्वितीयोत्पत्त्यनुक्तकर्मत्वस्य तत्र गमयतिक्रमसंयोगोऽत्वमि
त्यत्र णिजर्थे निरूपितनिरूढकर्मत्वस्यैव विवक्षितिकत्वाणिजर्थकर्मत्वस्य
क्रमेसत्वे तेन पाचयत्यादियोगे प्रयोज्यकर्तृवाचकाद्वितीयापत्तेरतः सेत्ता।
यापदद्वितीयोत्पत्तौ तत्र तत्रानुसर्तव्यात्तथा च तत्तत्पदानतिप्रसंगेन कृतं तत्र द्वि।
तीयाशङ्कतिभावः ननु तादृशाकर्मत्वमेव द्वितीयानियामकं उक्तस्थले [illegible]।
क्रमेस्तत्वेष्वपानगमनार्थकाप्ततिरिक्तणिजन्तयोगे न त्विति अन्वये णा।
नद्विविवक्षाबाधनाज्ञाकापत्तिर्विवक्ष्यापदविभक्त्यसत्वेन तत्राप्यवसमा।

ल॰ टी॰ ७९

नादत्तग्राह तंतुलेपद्यत इति तंतुत्वान्यसमवेतत्वेन न विशिष्टौ परसमवेतत्वकि
याममवेतयावच्छेद्यां अश्वत्वादिरूपेणेन तंतुत्वेकतरसमवेतसमवेतयावेद्यते उक्तरीत्यैवेति
तथाप्युत्पन्नत्वामित्याप्युक्तरीत्यैवेत्यर्थः यावदर्थव्यापारानधिकरणत्वश्रयोपस्थि
तिरूपेहत्वभावादितिभावः ननु नासमन्तेषूक्तप्रयोगापत्तिरत आनीप।
वेरकर्मकत्वेन तत्र विशिष्टेरेवव्यापारत्वेन तस्यायावद्यर्थनावच्छेदकत्वाभा।
वादित्याहूघणांतरमाह परसमवेतत्वस्य परसमवेतत्वस्येदृशत्वघटत्वाभा। शक्यत्वेपिपरत्वस्य
यानेकशः कार्यकारणभावाभ्युपगमे गौरवत्वतत्वादिरितिस्पष्टं भूषणे इष्टा
न्वयेति इष्टोयोन्वयः प्रकृत्यर्थस्य प्रतियोगिता संबंधेन परसमवेतत्वैकदेशे।
क्रिया परसमवेतत्वस्याश्रयतायां तस्यत्वाभावप्रमानायेत्यर्थः अनेकघाड।
तिप्रकृत्यर्थप्रकारकशाब्दबुद्धिं प्रतिहितीयाधीनाधेयत्वोपस्थित्यधीनपर
समवेतत्वोपस्थितेः प्रकारतासंबंधेन एवं परसमवेतत्वप्रकारकबुद्धिं।
प्रति धात्वर्थोपस्थितेर्भावनानावच्छिन्नविशेष्यतासंबंधेनेदृत्वकल्पने।

७९

२९

चातिगौरवादित्यर्थः ननु चैत्रमैत्रौ परस्परं गच्छत इत्यत्र परस्परंपदार्थयो
श्चैत्रमैत्रयोरुभयोरपि यावत्पदव्यापाराश्रयत्वमेव कर्तृसंज्ञा द्वाकर्मसंज्ञा
वाधकेन तादृशाकर्तृत्वस्य परस्परपदार्थे सत्वात्तत्र द्वितीयानुपपत्तिरिति वि
भाव्यते न तादृशकर्तृत्वगतप्रकृत्यर्थानर्थव्यापारव्यधिकरणत्वस्य प्रकृतधात्व
र्थफलाश्रयरूपविवक्षितकर्मत्वस्य कर्तृव्यापृतस्य परस्परकृतिफले द्वितीया
नुपपत्तिरित्याशयेनाह स्पष्टमिति कर्मत्वेन फलेन तादृशव्यापार
स्य स्वावच्छिन्नप्रतियोगितावच्छेदकत्वरूपेण क्रियायां निवेशनीयमिति ।
परस्परवृत्तिभेदप्रतियोगितावच्छेदकत्वस्य परस्परवृत्तिक्रियायामभावाद्यत्र
द्वितीयानुपपत्तिरिति तत्र व्युत्क्रमित्यर्थः तेन चान्यत्वमन्येन तादृशभेदप्रति
योगितावच्छेदकत्वरूपं वैयधिकरण्यमपि कर्मप्रत्ययस्य शक्तिः स्वीकर्तव्यमिति
बोध्यम् हरिकृतं कर्मविभागमाह एतत्सममतविषम निर्वर्त्यं च विकार्यं च प्रा
प्यं चेति त्रिधा मतम् तत्रेप्सिततमं कर्म चतुर्धान्यत्तु कल्पितम् औदासीन्येन

ल॰ ह॰ ४०

यत्नात्प्रयत्नकर्तृकं नीप्सितम् संज्ञान्तरैरनाख्यातं यच्च व्याप्यमपूर्वकं इति वा
क्यपदीयात् यदसज्जायते सद्वा जन्मना यत्प्रकाशते तन्निर्वर्त्यं विकार्यं च द्वेधा
कर्मव्यवस्थितं प्रकृत्युच्छेदसंभूतं किंचित्काष्ठादिभस्मवत् किंचिद्गुणान्तरो
त्पत्त्या सुवर्णादिविकारवत् क्रियाकृतविशेषाणां सिद्धिर्यत्र न गम्यते दर्श
नादनुमानाद्वा तत्प्राप्यमिति कथ्यते इति तत्रैवोक्तं घटं करोतीत्याद्यम्
काष्ठं भस्म करोतीति सुवर्णं कुण्डलं करोतीति च द्वितीयं घटं पश्यतीति तृ
तीयम् तृणं स्पृशतीत्युदासीनम् विषं भक्षयतीति द्वेष्यम् गां दोग्धीति संज्ञान्त
रैरनाख्यातम् क्रूरमभिक्रुध्यतीति चान्यपूर्वकम् । तच्चेति निरुक्तं कर्मे
र्थः यदसज्जायते सद्वा जन्मना यत्प्रकाशते प्रकृतेस्तु विवक्षायां विकार्यं
कैश्चिदन्यथा तन्निर्वर्त्यमिति वाक्यपदीयपाठः तत्र यदसज्जायते इति असा
द्यभिप्रायेण सद्वा इत्यादि कुण्डलाद्यभिप्रायेण ज्ञापकरूपेण स्थितमेवा
नन्तरं व्यञ्जकसामग्रीसमवधानेन यत्प्रतीयते इत्यर्थात् प्रकृतेस्त्विति

१०

तदुभयमपि प्रकृतेः काष्ठादिरूपाया असत्त्वाः सत्त्वा वा परिणामित्वेन विव
क्षायां विकार्यं केचिदसिद्धैराचार्यैर्विकार्यमिष्यते अन्यथा तद्विवक्षा
यां तन्निर्वर्त्यमित्यर्थः अयमर्थस्तत्राप्रकृतिवाचकपदासमभिव्याहृतपदे
प्रत्याय्यत्वे सति क्रियानिष्पाद्यत्वे निर्वर्त्यलक्षणमुक्तं भवति उक्तं च सतो।
वाविद्यमानाद्वा प्रकृतिः परिणामिनी यस्य नाश्रीयते तन्निर्वर्त्यं प्रचक्ष
त इति विकार्यमिति प्रकृतेस्तु विवक्षायामिति शेषः अन्यप्रतीयमानप्रकृति
विकृतिभावत्वे सति क्रियानिर्वाह्यविशिष्टासत्त्वोत्पन्नत्वरूपफलाश्रय
त्वरूपो लक्षणत्वमित्यर्थः तेन प्रकृतिपदोपादानानर्थक्यप्रसं।
गो नेति भावः परसूत्रं पतत्यस्मादुक्तेः स्फुटीकृतेः प्रकृतिविकृतिभावरूपा।
न्योपि विकार्ये विभजते प्रकृतेस्तु भेदेति प्रकृतिनाशप्रयोज्योत्पत्तिकमित्यर्थः
इदं च भस्म वा रिक्तं नेनान्वेति सादृश्यभेदाच्चरितत्वादुक्तस्य सादृश्यस्य भस्म।
न्यपि सत्त्वाद्भावात् उपादानस्यैतत्संग्राहकत्वेनाध्युपपत्तेः काष्ठादि।

ल॰ स॰ ८१

81

वेत्यर्थः एवमग्रेपि गमनोत्तरोत्पन्नासंयोगादिर्विकारश्चैत्रगामित्वानुकूलो
देवेतिबोध्यम् तथाचकाष्ठंभस्मकरोतीत्यत्रकरोतेर्नाशोत्पत्तिरूपफलद्वये
तदनुकूलव्यापारश्चाग्निनाशोप्रतियोगितयाकाष्ठस्योत्पत्तौभस्मनश्चाधेयत
यान्वयात्काष्ठप्रतियोगिकनाशानुकूलोभस्मोत्पादकोवर्तमानोव्यापारइत्य
र्थः आश्रयः प्रतियोगीवाधेयत्वाधेयत्वेहितीयार्थः अनयैवदिशातण्डुलानोदनं
पचतीत्यादौबोध्यम् इति क्रियाकृतेति क्रियाश्रयोप्यासाधारणधर्मप्रका
रकप्रतीत्यविषयत्वेसतिक्रियाजन्यफलाश्रयत्वमित्यर्थः निर्वर्त्यादावतिव्या
प्तिवारणायसत्यन्तम् निर्देशक्रमेणोदाहरणान्याह घटंकरोतीति आदि
प्तिनिर्वर्त्यमित्यर्थः सन्तानैरिति उपादानत्वादिनारूपेणविवक्षितमि
त्यर्थः तथाचतत्तद्विवक्षायांशर्करादिविधेयस्यसंकोचनत्वमृतिः एवंचगांपयोदो
ग्धीत्यत्रगोकर्मकपयोनिष्ठविभागानुकूलएककर्तृकोव्यापारइतिबोधः
अंतःस्थितगव्य निष्ठविभागानुकूलोव्यापारोदुहेरर्थः तत्रगोविभागाश्रयत्व
य

८१

रूपापादानत्वाविवक्षायां प्रकृतसूत्रेण कर्मत्वे द्वितीया तद्विवक्षायां तु पंच
मी गोः पयस्वत्वेयत्नषष्ठी तथा च गोः कर्तृकर्मभिन्नत्वरूपाप्रधानकर्मत्वाद् द्वि
प्रधानेदुह्यादीनामित्यनुशासनात्तत्रैव कर्मप्रत्ययो गौर्दुह्यते क्षीरमिति बो
ध्यम् एवमन्यत्रापि अमपूर्वकमिति प्रमकामसंज्ञाबाधनत्स्वेधात्वरूप्र
णीतकर्मकामित्यर्थः गतिबुद्धीति सूत्रस्य विधिनियमपरत्वादिति दर्पणे
निरूपितं तत एवावधार्यं क्रमप्राप्तं तृतीयार्थं निरूपयति २ कर्तृत्वे तृती
याया आश्रयोऽर्थः तथा हि स्वतंत्रः कर्ता स्वातंत्र्यं च धात्वर्थव्यापाराश्रयत्वम्
धात्वोक्तक्रियेति नित्यं कारके कर्तृत्वेष्यत इति वाक्यपदीयात् अत एव यद्
यदीयो व्यापारो धातुनाभिधीयते तदा स कर्तेति स्थाली पचति अग्निः पच
ति एधाः पचंति तंडुलाः पच्यंते स्वयमेवेत्यादि संगच्छते १ करणे तृतीया
यामर्थो व्यापारस्य वक्ष्यमाणत्वात्कर्त्रेति प्रत्ययश्च इति तत्त्वाञ्चमित्यर्थः तत्र प्रमा
णमाह तथा हीत्यादि ननु स्वातंत्र्यमितरानधीनत्वं तच्च न काष्ठे पचती।

ल॰ मादौ काष्ठादिरूपे कर्तरीत्यत आह स्वातंत्र्येणेति यावत् प्रयोक्तेति तज्ज्ञानजन्यत।
द॰ ज्ञानजन्यव्यापाराश्रयत्वमित्यर्थः व्यापाराश्रयत्वस्य करणेष्वपि वर्तमानत्वादत उक्तं कु
८२ ठारादिकर्मणि यावज्जन्यव्यापाराश्रयत्वस्य जीवात्मनि मनसा चेष्टायामप्यारोपः कर्त्रादिकर्म।
णि पतितप्रसक्तत्वात् तदावरणाय यथायथ्येन तत्पदोपादानम् ननु स्वतंत्रः कर्तेत्य।
त्र स्वतंत्रपदस्य यावत्प्रधानव्यापारवत्तायामेव किं मानमत आह यावदिति प्र
न एवेति स्वतंत्रपदस्य कार्यकत्वादेवेत्यर्थः कृत्याश्रयत्वादेः कर्तृतायोग्यत्वे ल॰
गत्येव स्यादिति भावः विवेचितव्यप्रयोगानियामिकस्य कार्येऽवस्थितिः व्यासा
क्तिविशेषमात्रेण कर्तृ २ ॥ नन्वेवं कर्मकर्तृत्वव्यपदेशाद्वेति सूत्रे मनोमयः प्रा
णशरीर इति वाक्यस्य मनोमयत्वस्य जीवे तेन वाक्यशेषेण तस्य पतनमितः शेषा
भिसंभवितास्मीति प्राप्तिकर्मकर्तृत्वव्यपदेशो विरुद्ध इति भगवता व्यासेनानि
र्णीतेऽकर्मकर्तृगच्छनाम उच्यते जीवस्यैवस्वेन पदेन प्राप्तिकर्मत्वमपि वाच्यम् ।
कर्तृत्वेन तस्याव्याप्तेनोक्तम् नैकस्य कदाचिदेकत्र कर्मत्वं कर्तृत्वञ्च कर्मत्वकर्म

८२

सेव्यायावाधात् तथाचैतमितिद्वितीयानस्यात् कर्मकर्तृत्वायोचयणाद्याप
तिविनिशाद्वविशेषणतामभवतिमभेदेहेतुः एवंचव्यापारांशस्यघान्तलभ्यता
दाश्रयमात्रेतत्तीयार्थः कारकचक्रशयोऽकृत्वेकृत्याश्रयत्वेवादेङ्कःकरोतीत्यत्रा
यामम एवमितिविवक्षायाएवशब्दघोगनियामकत्वमित्यर्थः वाक्यत्वकर्तृत्वा
दिसत्तायाम्तदनियामकत्वमितियावत् मनोमयस्येतिमनोमयशब्दप्रतिपा
द्यार्थस्येत्यर्थः जीवत्वेसेकल्पकर्तृत्वएवत्वमित्यर्थः शुद्धत्वमितियावत् एत
मितइत्यादिविनः शरीरास्येत्यएतच्छरीरेपरिमत्वएवेष्टवेक्रमवप्रकाशादि
गुणकमात्मानमभिसेभवितास्मि सेशतिपत्तास्मीत्यर्थः कथमितिभवमते
वैवत्तिकयोः कर्तृकर्मत्वयोरेकस्मिन्नपिसंभवादितिभावः सेत्तानिवेयनप
वनत्रविशेषोवाक्यत्वमत्वविशेषणवेत्याह उत्पत्तइत्यादि जीवस्यैवसेपत्तइति
सकृतेऽजीवतिमनेनजीवस्यैवोपास्यत्वबोधनमित्यर्थः प्रामिकर्मत्वमपीति
तदुपासनायाएवतस्याभिफलकत्वस्यान्यत्वर्णनादितिभावः शाख्याते

ल॰
सु॰
८२

ति शमिसंभवितास्मीत्यनेनेत्यर्थः वाधादिति पश्याकर्तृसंज्ञयावाधादित्यर्थः
यथाथापतितित्यनुवृत्यवारः प्राप्यकर्मणिनहयसकेः शाद्विशेषेति ननुसं
ज्ञाश्रयकार्यस्येकस्मिन्नेकदासंभवादितिभावः स्वतिमेत्ताद्वयविशेषः।
भेदहेतुविति कर्तृकर्मत्वव्यवहारोवैलक्षण्यनिदानमित्यर्थः ननुतावताति
विष्टाश्रयस्योक्तत्वनीयार्थत्वेलब्धेनाश्रयमात्रस्येत्यतआह एवंचेति यात्वा
न्व्यापाराश्रयस्यकर्तृत्वेचेत्यर्थः आश्रयमात्रमितिव्यापारासंस्पृष्टाश्रयएवे
त्यर्थः [illegible] ननुदर्शनोत्तरश्रमि
दंक्तमाश्रयत्वादिरूपंतत्किमित्यपेक्षितमित्यतआह कृत्याश्रयत्वमिति आ
श्रयत्वमिति अचेतनेनतद्योगादितिभावः कर्तृविभागमाह २ अथचत्रिवि
धः शुद्धः प्रयोजकोहेतुः कर्मकर्ताच मयाहरिःसेव्यते कार्यतेहरिणागम
यति कृष्णंगोकुलं मद्भिन्नाश्रयकोहरिकर्मकसेवनानुकूलोव्यापारइति
शाब्दबोधः तृतीयार्थत्वेननिरूपितःकर्ताचायमित्युक्तः शुद्धइति प्रेरणार्थ

कर्त्तरि प्रकृतिधातूपात्तव्यापाराश्रयत्वमर्थः हेतुविहितणिजर्थप्रेरणाश्रयत्व
मर्थः कर्मकर्त्तरि धातूपात्तव्यापाराश्रयत्वे सति णिजर्थव्यापारेणाप्रधा
नेनेन विवक्षितत्वमर्थः कर्मणोदाहरणान्यारम्भयासेव्यन्त इति करणतृती
यार्थं निरूपयति २ करणतृतीयास्वाश्रयव्यापारेणैवाव्यवहितेत्यादि साधकतमं
करणम् तमबर्थः प्रकर्षः स चाव्यवधानेन फलजनकव्यापारवत्त्वं तादृश
व्यापारवत्कारणं च करणम् उक्तं च वाक्यपदीये क्रियायाः परिनिष्पत्तिर्य
द्व्यापारादनन्तरम् विवक्ष्यते यदा यत्र करणत्वं तदा स्मृतम् वस्तुतस्तदनिर्दे
श्यं न हि वस्तुव्यवस्थितम् स्थाल्या पच्यत इत्येषा विवक्षा दृश्यते यत इति व्यव
स्थितस्यानेन सहकर्तृत्वेन केषांचित् भावादिहितीयासमप्यादेवकार्णप्रत्ययति २ आ
श्रयव्यापारावच्छिन्नत्वेन योगरूढेन निर्देशाराश्रयो व्यापारस्तु विशिष्टकालितावि
वक्षकैर्नानातः परार्थैकदेशान्वय इति भावः वस्तुतस्तु आश्रयेण क्रियायाश्चेत्त्व
कृतिश्चमयार्थयोरभेदान्वयनियमस्य समासार्थं स्पर्शितता दभावेन तृतीया

र्थे व्यापारे प्रकृत्यर्थस्याधेयतासंबन्धेनान्वयोपगमेनैव विवक्षितत्वात्तार्थलाभात् व्या
पारेतस्याधेयत्वेनगतेन त्यागविधिविधेयतयाकरणस्यापि व्यापाराश्रयतालाभसं।
भवादन्यथा तद्वर्थाश्रयप्रकारककबोधानन्वयापत्तेर्विशेष्यतयाद्रेकत्वस्य।
द्वितीयादिस्थलेऽन्वयमनानस्यात्तृतीयार्थान्वयव्यापारस्यैवनाश्रयप्रकारकव्या
पारविशेष्यकबोधानापत्तेः अपिचमन्यूनानसंमेयं कर्तृत्वतृतीयायाश्च करण
णत्वतृतीयायाश्च पिव्यापारशक्तिरस्तु विवेतितत्वनयतोयात् पानव्यापाराश्रयसं
वेकर्तृत्वयानद्रूतव्यापारस्यथात्वनाभियानेपिकरणगानस्यनस्यथात्वनाभिया
नेमानाभावाद्दानोर्निहृत्वभेदायापवक्रियायाश्रवगामेनक्रियाद्दयस्यनेनाभि
धानमशाक्यत्वात्करणकर्तृत्वं वद्दावस्यसेकीर्णानाधेनस्येतितत्तृतीयायाव्या।
पारेशक्तिरत्वयपकेतमभिप्रेयोज्ञार्थस्तत्रप्रमाणायति तथाहीत्यादिसाधकान
मस्मिति साधयतिनिष्पादयतिफलेनव्यापारेणेतिसाधकेफलजनककव्या
पाराश्रयः साधकपदार्थः ततःप्रकृत्यर्थनावच्छेदकगानप्रकर्षयोतकतम।

याकारकांतरव्याहृतकरणत्वसत्वाभस्त्याहृतमवर्थः प्रकर्षइति सर्वेति प्रक
र्षेश्चेत्यर्थः तथाचव्यापारः फलोपहितत्वंतत्फलयोगव्यवछिन्नत्वात्दृशव्या
पारवत्वंकरणत्वलक्षणमित्यर्थः इदंचवास्तवमेवतनतृतीयानियामकंकिंतु।
विवक्षितमित्यत्रवाक्यपदीयंप्रमाणयति उक्तंचेति वस्ततःइतितत्करणत्वम
वस्ततोवास्तवंतृतीयायाःनैवनियामकमितितत्कथमित्यर्थः इदंचवास्तव।
मेवनतृतीयानियामकमितिहृदयंतः तृतीयाप्रयोगेस्थाल्यादेःकरणमुक्तरू।
पेणनियतम स्थाल्यामधिकरणत्वस्यनिश्चितत्वात यदिचमैवततनुत्वकपाल
त्वादिनाविछिन्नव्यवहितत्वंहतिव्यापारवत्वेनविवक्षितेनतदासापितृतीया।
योग्येत्यर्थः प्रवकाशमितिकरणत्वाविवक्षायांतुज्वलेस्थाल्यांपचती
त्यादौतत्कारकविवक्षायांततत्सत्ताप्रयुक्तद्वितीयादेःप्रवकाशमित्यर्थः त
थाचकाष्टैःपचतीत्यत्रप्रकृतमर्थकाष्ठादेरभेदेनान्वयतद्रूपतृतीयार्थेत्ययस्तस्य
चयुत्पत्तिवैचित्र्यात्समानप्रत्ययोपात्ततत्वेप्रत्यासत्याव्यापारत्वपत्तदूपतार्थेत।

ल॰ र॰ ८५

स्वजन्यजनकभावसंबंधेन विशिष्टमनुकूलयत्नर्थव्यापारश्चेतिकाशुभित्राश्रय।
फलोपाहितव्यापारविशिष्टविक्लमनकूलोव्यापारश्चेतिबोधश्चेतिबोध्यम प
नाचनाकरणत्वकर्तृत्वाधिकरणत्वादिनविरुद्धम यदाचयस्यविवक्षातदातस्य
प्रकृतकार्यमितिप्रतिपादितम नत्रशंकते २ ॥ नचैवं कर्तापपत्तार्थत्वात
ऽत्यन्तरमीमांसाधिकरणशक्तिविपर्ययात इतिसूत्रेणतः करणस्यकर्तृत्वे।
करणशक्तिविपर्ययापत्तिरुक्तानत्वन्येनेतिवाच्यम तदेतेषोप्राणानांविज्ञा।
नेनविज्ञानमादायेतिश्रुतेतेनकरणतयाश्रुतस्यकर्तृत्वेनाप्रकल्प्यमाने शक्तिवि।
पर्ययापत्तिर्निष्प्रमाणाकल्प्येतेत्यभिप्रायात वस्तुतस्तु मुख्यमात्रमेतदि।
ति यथाचनत्वोभयथाप्यधिकरणभाष्यपर्यन्तस्पष्टमिमारिप्रपंचितेमपणो
एवमिति कर्तृकरणशक्त्योरेकत्राभ्युपगमस्यार्थः बुद्धिः कर्त्रीभोक्तापुरुषश्च
तिसांख्यमतविडनाये हमधिकरणोद्वितीयाध्यायत्रतीयपादेकर्ताशास्त्रा।
र्थवत्वादिति आत्मैवकर्तानबुद्धिः तथाभ्युपगमपर्वकर्तृत्वेपत्तितोपायवोध

कविपर्याणस्य यत्तेनज्ञस्यादिन्नाकारकस्यसार्थकामुपपद्यते अन्यथात
त्रिरर्थकमेवस्यादितितदर्थः नत्रबुद्धिपदस्यवहार्थविज्ञानमेवात्मकत्रित्वापो
कार्याशक्तिविपर्ययादितिसूत्रेणविज्ञानपादस्यवाच्यबुद्धेःकर्तृत्वाभ्युपगमेबुद्धि
गतायाकरणशक्तिस्तस्याविपर्ययोविलोपस्तस्मसंगादित्यर्थः नपुनस्तेनविवि
क्तेनत्यर्थः भवद्भिस्तयोःशाक्रोर्विवेर्थानभ्युपगमादितिभावः पाक्तिविपर्य।
यादितिसूत्रेणनतयोर्विवेदः समर्थ्यतेकिन्तुपदेशाच्चक्रियायोनवेत्रिदेशा।
विपर्ययइतिसूत्रेण क्रियायांलौकिकवैदिकरूपायां विज्ञानेयत्तेनन्नेतेका।
मीणिवन्नेनापिचेतनत्वविज्ञानपदार्थस्यात्मनःकर्तृत्वव्यपदेशात्तस्यैवकर्तृत्वे
पयुक्तार्थोनकिन्त्वविज्ञानपदार्थोविज्ञानेनविज्ञानमित्यत्रनिश्चितकरणपा।
किकप्वेतदानिर्देशाविपर्ययः विज्ञानमितिशब्दमात्रनिर्देशस्याभावप्रसंगः
कितकरणशक्तिप्रयुक्तत्वनीयांतापानेविज्ञानेनिनिर्देशःस्यादित्यर्थः के।
नापादितेत्वजीयांतनिर्देशोप्रामाणमज्ञात्वेतेरत्नायायेनसमाधत्तेतेरनेषा।

मित्यादिना प्राणानामिंद्रियाणांविज्ञानं शब्दणाशक्तिविज्ञानेनमनसादायशुद्धी
नेनिश्चत्यर्थः करणानयेविकरणानयावयावितस्यमर्थः निष्पमाणेनिविज्ञा॰
नपदार्थेकर्तृत्वस्वीक्रियमाणेलोकेसमर्थस्यापिसर्वथासहकारिकारण
सापेक्षस्यैवकार्यकारित्वदर्शनात्करणशक्तिप्रयुक्तनिर्देशात्सहावकस्ये॰
वभविष्यति ननुकस्यैव विवक्षितकर्तृत्वार्थकविज्ञानपरस्येतितन्निर्दे
शापत्तिर्नेप्रमाणिकीतिनदोषशापादित्यर्थः ननुतावतापिशङ्कोपाधिविरोधो
नसमर्थितएवेत्यतआह वक्तृत्वस्विति ग्रन्थावयवेतिपत्वछात्रिविलोपश्च॰
सेगरूपेरूपाणां ग्रन्थावयवेचवक्तृतात्पर्यविषयविधेयार्थसन्निधेयोगापत्ति॰
नत्वम ननुतदेशेनतस्यानिर्भरत्वमर्थः प्रकृतिशक्तिविपर्ययप्रतियानेवक्तृ
त्वात्पर्याभावात् यथाचेतिवक्ष्यमाणदृष्टान्तसङ्गाहुदेः कर्तृत्वनियामपवता
त्पर्येवथाप्यादितिभावः तदेवाह यथाचेति यथाहुः पराभिमतशुद्धिकर्तृ
त्वनियामार्थः परमात्मभिन्नस्यनकस्यापिशुद्धादेः कर्तृत्वभोक्तृत्वादिकंसंभ॰

वतिउद्देवेचेतनत्वाज्जीवस्यनित्यत्वदमकत्वस्वरूपत्वात्किन्तव्यस्तेतनतत्रस्वीक।
र्तव्ये तत्राविद्यादग्णेपरमात्मनोपिसंभवतिमदितत्वंतेषघपतीतिश्रव
णात् विद्यावस्थायांतत्तस्मावोपि नकिंकेनपश्येदितिश्रुतेर्यथा तत्तो
भयथा गृहीतत्वास्यादिकरणःकर्ताद्वःस्वर्षेकाभवतिसएवशूद्रमागमयति
र्मुक्तसाधनःसाक्षीभवतितद्वदित्यर्थः तथाचद्वयोःशाङ्गयोर्विशेषतदनिभ
नू. र्णनत्रिशेषत्वतिभावः समस्यार्थेनिरूपयति २ ॥ समस्याश्रयाश्रयोर्थः
समस्याधिकरणेचेत्यधिकरणेसप्तमीतत्राधारोधिकरणमितिसूत्राद्दा
धारः तत्राश्रयत्वम् तत्राश्रयोपाशःशक्यत्वस्त्वसमवच्छेदकम् तत्राश्रयत्व
मात्रेणकर्मकर्तृकरणानामाधारसंज्ञास्यात् स्यादेवेयदितानिरस्यतित्वा
पःस्यात् कारकत्वस्यापिकृतत्वविहितसप्तम्याःक्रियाश्रयत्वमेवयघ्यपितात्प।
र्यम् तथापिश्रवकर्तृकर्मद्वारानत्राश्रयत्वमस्त्येवस्यात्स्यादेर्भूतलकटादे
रेवेतिस्यात्स्थपचतिभूतलेवमतिकटेशेतइत्याद्युपपद्यते उक्तंचवाक्यपदी

न· टी· ८७

87

येकर्तृकर्मव्यवहितामसाक्षाद्धारयत्क्रियाम् उपकुर्वत्क्रियासिद्धौ शास्त्रेऽधि-
करणंस्मृतं एतच्चत्रिविधमौपश्लेषिकम् वैषयिकमभिव्यापकंच कटेशे-
तेगङ्गायांवसति मोक्षेइच्छास्ति तिलेषुतैलमिति एतच्चसंहितायामितिसूत्रेभा-
ष्यस्थम् १ ननुतत्राधाराधारस्यसमसम्पर्कत्वशक्तीनेः कथंतस्याश्राश्रयार्थो
क्तेत्यतआह तत्त्वेचेति आधारत्वेनेत्यर्थः आश्रयत्वमितिनिरुक्तस्वरूप-
मित्यर्थः तथाचाधारपदार्थेः समानार्थकत्वानुपपत्तिरितिभावः ननु
धात्वर्थाश्रयस्यतद्धात्वर्थेनान्वयेनाश्रयमात्रस्येत्यतआह आश्रयांशेइति
इत्यंशेकरीत्याफलव्यापारात्मकक्रियायाधात्वर्थेनलाभादनन्यलभ्याश्रयपद-
वाक्यस्फोटनिरूपणामितिनभिप्रेत्यमूलमवतारयति २ ह्रमिङन्तवयह
पवाक्यस्यापितदाह द्वैवेत्यादिदृष्टैश्चवाक्यस्फोटंविनिश्चित ग्रन्थेर्वि
शिष्यसंबंधाग्रहणाचेत्यसंपदे लक्षणादयुनावेत्यदेर्थ्यप्रसुतत्तथा द्वेव तं॰
विस्कोवेत्यादौपदयोर्वेङः पदान्नादन्तौप्येकादेशसत्तिनतुद्विभागः सुत्रा।
नः तथाचप्रत्येकपदाज्ञानेपिसमुदायशक्तिज्ञानाच्छाब्दबोधात्समुदाये

प्यावच्छेदकीभूतशक्तिः एवं प्रकृतिप्रत्ययेषु विशिष्यज्ञायमानेष्वपि समुदायव्यु
त्पत्त्या बोधात्तत्राप्यावच्छेदकं शक्तिरिति भावः वस्तुतः पदैः पदार्थबोधवद्वा
क्येन वाक्यार्थबोध इति पदार्थशक्तिः पदेष्विव वाक्यार्थश
क्तिर्वाक्येऽभ्युपेयेति पदस्फोटवाक्यस्फोटौ व्यवस्थितौ ॥ अन्यथा घटः कर्मत्व
मानयनं कृतिरित्यादौ तादृशव्युत्पत्तिरहितस्यापि बोधप्रसंगः घटमानये
त्यत्रैव पदार्थानुपस्थितौ सत्यपि तात्पर्यज्ञाने बोधाभावाच्च तत्रैव घटः कर्मत्व
मानयनमिति बोधे घटार्थकप्रातिपदिकोत्तरं कर्मत्ववाचकविभक्तेस्ततो धा
तोस्तत आख्यातस्य समभिव्याहारः कारणमिति कार्यकारणभावज्ञानवतो
बोधात्तज्ज्ञानमपि हेतुरिति चेत्तर्हि सिद्धो वाक्यस्फोटः घटादिपदार्थबोधे बो
धकतारूपपदशक्तिज्ञानकार्यकारणभावस्येव विशिष्टवाक्यार्थबोधे पदस
मभिव्याहाररूपवाक्यनिष्ठबोधकतारूपवाक्यशक्तिज्ञानस्यापि हेतुत्वक
ल्पनात् अर्थोपस्थापकज्ञानविषयशाब्दबुद्धिजनककरणत्वस्यैव शक्तित्वात्

शक्तं चैतत् विषयतासंबंधेन शाब्दबोधमात्रे हेतुत्वात् तेन स्फलावधेन देवदत्तसिद्धेः
विवेचितं चैतत् भूषणे । तदितिवाचकत्वम् तद्विभागः इति पदविभाग इत्यर्थः स
मुदाय इति कृतेत्कादेशापदसमुदायरूपेवाक्य इत्यर्थः एवमिति वाक्यशक्तिव
दित्यर्थः विशिष्टस्यानवशिष्टरूपेण समुदायत्वमसमेति समुदायस्य वाचकत्व
ग्रहणेत्यर्थः बोधादितिप्रकृत्यर्थविशिष्टप्रत्ययार्थबोधादित्यर्थः तत्रापिसमि
ईन्नपदेपिशक्तिरितितत्कल्पनेत्यर्थः ननु चैतेनत्यादिस्थलेन समष्टिशक्तिकस्फो
टस्य स्वाविशेषणबोधनाकर्षं पदस्फोटसाध्येवाक्यस्फोटस्य दृष्टान्तत्वम् ।
किंच पदस्फोटासिद्धौ न दृष्टसंसर्गरूपवाक्यार्थसिद्ध्याख्यवाक्यार्थबोधकत्वरू
पवाक्यस्फोटस्य सिद्धता येन तस्य दृष्टान्तता संभाव्येतेत्यपरितोषात् पदस्फोटदृ
ष्टान्तीकृत्यैव वाक्यस्फोटसाधयति वस्तुत इति तथा च यत्र पदेष्वेव पदार्थोपस्था।
क्तिस्तदाकांक्षादिवशाद्वाक्यार्थबोधस्तत्र पदस्फोटाय इत्यमान्तर्गवीभंगेन पद
स्फोटासंभवः पदानि स्थुया हरे वेत्यादौ तत्र वाक्यस्फोट इति व्यवस्थिता वितिप

ल्र
दं
२०१
201

द्रव्यत्वसमसिद्धोऽर्थ इति केचित् मत्वाग्रिमग्रन्थपर्यालोचनया सर्वत्रैव पदवाक्यस्फो
टयोरविशेषेणार्थकत्वमनुमतं तयार्थावस्थितपदस्य निष्कृष्टार्थपरत्वस्यैवावग
मात् ननु पदस्फोटेनैव वाक्यार्थबोधोपपत्तौ कोऽर्थो वाक्यस्फोटस्वीकारेणेत्यत आह अन्य
थेति वाक्यशक्त्यनभ्युपगमे इत्यर्थः ताहशेति पदार्थसंसर्गबोधकत्वरूपवाक्य
शक्तिज्ञानरहितस्यापीत्यर्थः तद्धीतिसत्वेन तदापि बोधस्त्वेवेति भावः बोध
प्रसंगा इति घटकर्मकानयनानुकूलकृतिबोधापत्तिरित्यर्थः पदवृत्तिज्ञानज
न्यार्थोपस्थितेः सत्वादिति भावः घटमानयेत्यत्रैवेति अत्र ताहशशक्त्यन्तिरहित
स्येत्यनुषज्यते ननु ताहशबोधस्यैवार्थतात्पर्यज्ञानाभावादेव बोधाभाव इत्यप
स्येत्यत आह सत्यपीति बोधाभावादिति उक्तबोधाभावादित्यर्थः किंपुनर्वक्त
वे घटः कर्मत्वमित्यत्रेति शेषः एतेन व्यतिरेकसहचारो दर्शितः इवशाहद्विरहित
पाठेऽन्वयध्याने त्वेवोधस्तथात्रेबोधाभावादिति व्यतिरेकमयम् अन्वयसहचारं दर्शि
यति तत्रेति घटमानयेत्यत्रैवेत्यर्थः ग्रहत्वत इत्यनेन स्वरूपसतस्तस्यावच्छे

२०१

दः तद्ज्ञानमपीति समभिव्याहारनिष्ठबोधजनकत्वज्ञानमपीत्यर्थः अस्मन्म-
ते तु क्रमसमभिव्याहारज्ञाननिष्ठबोधकत्वस्य वाक्यशक्तित्वेन व्यपदिश्यमानत्वे-
ऽप्यवच्छिन्नाकांक्षापदेन व्यपदेशात् नाम भेदेऽपि वस्तुभेदाद्वाक्यशक्तिः सिद्धैवेत्यभि-
प्रेत्याह तद्धीति ननु शाब्दबोधहेतुर्योपस्थितिजनकसंबंधः शक्तिः सा च थन-
पदेर वन वाक्ये तन्निष्ठबोधकतायास्तादृशोपस्थित्यजनकत्वादत आह अर्थोपस्था-
पकेति शाब्दनिष्ठपदबोधजनकत्वमित्यर्थः ध्वन्यात्मकशाब्दनिष्ठबोधकत्वस्यो-
प॰ हन्निवाडक्रम र्थोपस्थापकेति तथा चोपस्थितेः शाब्दहेतुत्वानिवेशेन
वाक्यवृत्तिज्ञानस्य तादृशोपस्थित्यजनकत्वेऽपि न वृत्तित्वक्षतिः संसर्गस्य वि-
शिष्यानुपस्थितत्वेऽपि यथा शाब्दबोधात्माकनुदत्तथा वक्ष्यत इति भावः न-
न्वस्यादौ वोक्तप्रकारैर्यदि निरुक्तबोधकतायाः शक्तित्वं सप्रमाणं स्यात्तदेव त-
न्नपदनिष्ठबोधकतारूपशक्तिज्ञानादेवाकांक्षाज्ञानबलाद्वाक्यार्थबोधोपप- ज्ञा॰
त्तेः आकांक्षावाक्ययोर्भवन्मते पर्यायत्वेऽप्यस्मन्मते वाक्यस्यानुपूर्वीसत्त्वेनका-

ल॰
द॰
१०२

202

शाब्दत्वावच्छिन्नविषयबोधकत्वेनेति विशेषणादत्रस्याह युक्तंचैतदिति एतत्समभि
व्याहाररूपवाक्यनिष्ठबोधकत्वे शक्तिमेवाह विषयतयेति शाब्दबोधमात्र।
इतितत्सामान्यइत्यर्थः वृत्तिज्ञानस्येति विषयतयेत्यत्रयुज्यते लाघवादिति प
दपदार्थभेदभिन्नपदवृत्तिज्ञानजन्यपदार्थोपस्थितिकार्यकारणभावेवृत्त्यप्र
वेशेनलाघवादित्यर्थः अयंभावः शाब्दबोधसामग्र्यांपदार्थोपस्थितेःपदज
न्योपस्थितत्वेनैवनिवेशोनतुपदवृत्तिज्ञानजन्योपस्थितित्वेनगौरवात् समवा
येनोपस्थिताकाशस्यजनकतयोपस्थितेदेवदत्तादेस्तद्भानवारणायपरंविष

शाब्दभानेविषयतया।

यतयावृत्तिज्ञानस्यहेतुत्वंवाच्यमतथाचसंसर्गस्यवृत्तिज्ञानविषयतांविनाशा
ब्दभानानापत्तावित्यकत्वरूपावृत्तिर्वाक्यस्यावश्यकेति तदेवाह विवेचि।
तेचेति अधिकंवृद्धदर्पणादवधेयम् २ ननुवाक्यार्थस्यापूर्वत्वात्कथंतत्रश
क्तिग्रहइत्याशंक्याहअर्थेइति वाक्यस्येतिशेषः वाक्यस्यवाक्यार्थेविशिष्टश
क्त्यग्रहणाच्चेत्तर्हिपदेपिसमम् पदस्यवान्वयांशेशक्तिरितिपदेपितत्तुल्यं।

१०२

भवस्तत्त्वइत्यर्थः यदिचपदशक्तिःपदार्थांशेज्ञाताऽन्वयांशेवाज्ञातोपयुज्यत
इतिकु त्रैशक्तिवादस्तदाममापिवाक्यशक्तिरज्ञातेवोपयुज्यतइतिवादाभ्यु
पगमस्तत्त्वइत्यर्थः ननुतूष्णींभावादावुपस्थितोमनसापदार्थवद्वाक्यार्थोपिन
त्रुहइतिचेन्नत्वमित्याद्यलक्षणादितिलक्षणेनकथितेनेनेतिलक्षणाम् मन
स्तस्मात् अपिःपदपदार्थांतरंबोध्यःपदेपिलक्षणानत्रुहस्वेनतांस्तुवाक्येपी
तिशेषः वस्तुतस्तसमुदितार्थेविशिष्टवाक्यस्यैवप्रथमंनत्रुहश्चावापोद्वापा
भ्यांपरंप्रत्येकंतत्रुहइतिबोध्यम् १८२ अएर्वमादितिनस्पष्टांहैकगम्यत्वेन।
शाब्दबोधान्स्वंप्रत्यक्षाद्युपस्थितपदार्थनिरूपितशक्तिग्रहःस्वलभ्यएवेति परेसममितिमूलमतं (उपपत्त्या)
(मूलाशयंवर्णयतिपदएवेति) अन्वयांशइतिपदानामेवान्वितपदार्थेशक्तिरन्वयश्चसामान्यरूपेणज्ञातः
अतएवघटादिपदादन्वितघटाद्युपस्थितौनियमेननतत्त्वतियोग्याकांक्षाभ
वति किमन्वितोघटःकिमन्वितकमेवमिति सामान्यधर्मप्रकारकज्ञान
स्यविशेषधर्मप्रकारकजिज्ञासाजनकत्वात् विशेषरूपेणानज्ञातेवमादि

ल॰ पदसमभिव्याहारोनियामकोनतएवतस्यशाब्दभानंपदवृत्त्यविषयत्वात् अश
द॰ क्यस्यभानेतिप्रसंगात् नचाकांक्षायास्तद्भासकत्वावश्यकत्वेनतत्रपदस्यवृत्ति
१०३ कल्पनाव्यर्थेतिवाच्यम् अशक्यभानमियेवतत्रतदभ्युपगमात्तथाचपदशा
क्त्यैवसंसर्गभानोपपत्तौनतत्रवाक्यस्यशक्तिः पदत्वापेक्षयावाक्यस्यगुरुत्वा
च्चेत्यन्विताभिधानवादिमतेपि पदेष्वपूर्वसंसर्गशक्तिग्रहासंभवस्तत्स्वरूप
र्थः ज्ञातेतिपदार्थानामाप्रानुपस्थित्वात्तत्रपदशक्तिग्रहसंभवादितिभावः
अज्ञातेवेतिवृत्त्यभ्युपगमस्तत्रशाब्दभानानुपपत्तेरेवेतिभावः पदार्थवदि
तिसमभ्यर्थ्योहतिः उपमेयेसममीदर्शनात् वाक्यार्थेपीतिसंसर्गेपीत्यर्थः
इदंचवीप्सत्वेशक्तिरित्यभिप्रेत्य तदुक्तंलक्षणापाद्यस्यासायारणयमेवच
नस्यनेदग्रहणामनपयुक्तवाकिंतुयौगिकस्यैत्यापायेनव्याचष्टेलक्ष्यतइति
मत्वेनिरूपितंसमभ्यर्थः तत्रतुदेकदेशानच्छूयार्थः शक्तिज्ञानेनेत्यभि
प्रेत्यव्याचष्टेपदेपीति अयंभावः यस्यचरमानयेमादौव्यवहारात्मदेशपस्थितेः १०३

संशयरूपायाश्चापि संभवान्न निश्चयार्थं शाब्दादृष्टान्तत्र शक्तिग्रहदेशलिंगादेर्निर्णा
यकत्वेन ज्ञानस्य संशयासत्वादिति ननु नियमेन शाब्दबोधात्पूर्वं मानसिकसं
सर्गोपस्थितौ मानाभावे तत्राह वस्तुत इति ननु दृष्टं निर्विशिष्टवाक्यार्थे शक्तिग्र
हः तथाच शक्तिग्राहकशून्यत्वाद्वद्वारेणैवं वाक्यं प्रमाणेन न तद्विषयज्ञा

दुड्.

स्मृत्याश्रयविषयकत्वस्वविषयोऽसंस्कारसामानाधिकरण्योभयसंबंधेन वै
शिष्टस्येदानीन्तनवाक्याज्ज्ञानोत्पत्तेर्वान्वयवृत्तिज्ञानस्य शाब्दधीहेतुतायां व्य
भिचारः मध्यवाक्यार्थोपस्थितेरनपेक्षत्वात्सुनोक्तदोषोऽपीति भावः ननु तर्हि
पदस्फोटस्यानिरालम्बनतापत्तिरतआह आवापोद्वापाभ्यामिति आनयमार
णाभ्यामित्यर्थः प्रत्येकमिति प्रत्येकपदे प्रत्येकपदार्थशक्तिग्रहसाहित्येनाको
त्वादिवर्णायदा वाक्यार्थबोधस्तदा पदस्फोटो यदा तु तन्निरपेक्षतामसाद्याका
ङ्क्षया वाक्यार्थबोधस्तदा वाक्यस्फोट इति पदत्रयोपपत्तिरिति भावः २३
यमेव मीमांसकानां वेदान्तैकदेशिनां गतिरित्याह सर्वत्रैव हि वाक्यार्थोलक्ष्य

सेवयुक्त.

स.

ल॰
द॰
२०४

पर्वेतियेविद्धः भाष्यखलेपीममेवाद्वलक्षणायाग्रहेणतिम् भाष्यश्रतिरुदन्
याथितोवाचस्पतिकल्पतरुप्रभृतीनामुपलक्षणम् सपुमेनत नन्वक्लप
लद्वयमनुपपन्नम् उच्चरितैरभिव्यक्तैर्वैकदाग्रसंभवेनवर्णसमूहरूपवाक्य
त्वानामसंभवश्रतिवेन्न उच्चरवर्णप्रत्यक्षमयेतस्मिन्नव्यवहितोत्तरे संवे
येनोपस्थितपूर्ववर्णावलम् तथातउच्चरप्रत्यक्षकाले उपस्थितविशिष्टता
द्रृणावचतस्मिन्नग्रहमितितात्पर्याद्वितिपदत्वसेववाक्यत्वस्यापि
सुग्रहत्वात् ९४ इतिश्रीवैयाकरणभूषणसारेवाक्यस्फोटनिरूपणम् १
उपलक्षणमितितन्मतेगंभीरयानघौघाघद्रय प्रमेकपदशंकाशंकासं
वेपरूपतलक्षणायावागभीयाभिन्नतदौतीयाधिकरणाबोधबोध्यासंभवा
त्ववोध्यसंवपुरूपलक्षणायावाक्यमा वेश्नुपगमादितिभावः पदद्वयमि
तिपदवाक्यभेदेनोक्तस्फोटद्वयमित्यर्थः अनुपपन्नोहेतमाह वर्णसमूह
रूपपदत्वानामसंभवादिति तत्रहेतमाह उच्चरितेति वर्णानित्यतावादिमते

पदत्वानासंभवात् तथा
वस्तुतेषां तत्त्वमूलरूपं

पदघटनाबद्धवर्णानामेकदैवोत्पत्तेरसंभवेनेत्यर्थः वर्णानांयोगपद्यविशिष्टविशेष-
णामेवैनैकोत्पत्त्यापूर्ववर्णस्यनाशादितिभावः वर्णनित्यतावादिमतेनापिकेवला
नांवर्णानांबोधाजनकतयाभिव्यक्तानामेवतत्वंवाच्यम् अभिव्यक्तेश्चतत्तत्प्रय
त्नाधीनतत्तत्कंठताल्वाद्यभिघाताधीनत्वेनैकदासंभवेनतद्विशिष्टानामपिते
षामुत्पत्तिवत्सदावस्थाना संभवेनेत्यर्थः अभिव्यक्तिपदमादायसमाधत्ते उ
त्तरवर्णप्रत्यक्षेति वर्णनित्यतावादिमतेवर्णानांसदैवसत्वादव्यवहितोत्तरत्वा नित्यां
दिव्यवस्थानापत्त्याभिव्यक्तिगतत्वस्यवर्णेष्वारोपेणैवतद्व्यवस्थाउपपादनीयः
एतद्बोधनायैववर्णविशेषणतयाभिव्यक्तेरुल्लेखः तथाचाव्यवहितत्वेसत्युत्त
रत्वम् अव्यवहितत्वंचस्वध्वंसानधिकरणक्षणसंबंधित्वम् तेनचघटितपट
त्वादौनातिप्रसंगः उत्तरत्वंचस्वाधिकरणक्षणध्वंसाधिकरणसमयोत्पत्ति
कत्वम् तेननपितृमपुत्रौ चमित्यादौनपीपुत्रभागस्यपदत्वम् अन्यनिरूपि
ताव्यवधानादेरन्यसंबंधाभावेनस्वत्वस्यपरिचायकतयाप्रवेशान्ननिवेशा

निर्वचनानुगमसंभावनाप्युत्तरोत्तरवर्णेषु स्थितिक्षणानधिकरणसंवैयधिक
रणत्वात्क्षणक्षमत्वात्तदधिकरणत्वात्क्षणक्षमाधिकरणसमयोत्पत्तिकत्वाच्च निरुक्त
संबंधेन पूर्ववर्ण वत्त्वमुत्तरोत्तरवर्णेष्विति वर्णविकलम् एवं च पूर्वपूर्ववर्णशालौ
किकस्य चरमवर्णे शैलौकिकप्रत्यक्षस्य संभवेन तत्रार्थबोधकत्वरूपशक्तेः सु
ग्रहत्वादुक्तस्फोटसिद्धिर्निराबाधेति इति श्रीलघुदर्पणे सखंडपदवाक्यस्फोट
निरूपणम् श्रीगणेशाय नमः अखंडस्फोटनिरूपणावसरसंगतिं सूचयन्ना
ह २ इदानीमखंडपक्षमाह पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च वाक्यात्पदा
नामत्यंतं प्रविवेको न कश्चन पदे पचतीत्यादौ न वर्णाः अवयवाः नाना वर्णास
मूहः पदमिति शेषः दृष्टांतव्याजेनाह वर्णेष्विति एकारौकारऌकारस्थका
रादौ वर्णेष्ववयवाः प्रतीयमाना अपि यथा नेत्यर्थः क्वचिदिवेत्येव पाठः एवं
वाक्येष्वाह वाक्यादिति पदानामपि वाक्याद्विवेको भेदो नास्तीत्यर्थः अयं
भावः वाक्यं पदं चाखंडमेव न तु वर्णसमूहः अत एव वर्णकल्पने मानाभावात्

तत्तद्वर्णोत्पादकत्वेनाभिमतवायुसंयोगनिष्ठेन तत्तद्वर्णजनकताया व्यंजकताया
वावच्छेदकं वैजात्यमादायैव ककारो गकार इत्यादिप्रतीतिवैलक्षण्योपसंभवात्।
स्पष्टं हि भामत्याम् तारत्वादिवायुनिष्ठं वर्णेष्वारोप्यत इत्युक्तं देवताधिकरणे ननु ए
वं वायुसंयोग एव वाचकोऽपि किन्न स्यादिति वाच्यम् प्रत्यक्षतोपलभ्यमानकका
रादेरेव वाचकत्वस्यानुभवसिद्धत्वात् तथा च वाचकत्वान्यथानुपपत्त्या तद्देवदेप
देवाकंसोयगकार इति प्रतीतिमात्रस्फोटोऽवरः सिध्यति एतेन गौरित्यादौ गका
रौकारविसर्गादिव्यतिरेकेण स्फोटाननुभवात् श्रूयमाणवर्णानामेव वाचक।
त्वमस्त्वित्यपास्तम् तेषां स्फोटातिरिक्तत्वाभावात् तत्र वर्णानां प्रत्येकं वाचक
त्वे प्रत्येकादर्थबोधापत्तिः समुदायस्य तु क्रमवतामाशुतरविनाशिनां तेषां वाभि
व्यक्तानां वा ज्ञानमसंभवेव एवं एववर्णानुभवजन्यसंस्कारसहकारेणैक।
दा समुदायालंबनरूपसकलज्ञानं संभवतु सरो रसः जरा राज नदी दीना इत्यादिसा
धारण्य इत्यतिप्रसंग इति स्फोट एवातिरेकेणाभिव्यंग्यो वाचक इति कैयटः। त

ल॑
द॑
१०९

206

नेष्वपि पदज्ञानसंभवस्योपपादितत्वात् वर्णानां प्रत्येकं व्यंजकत्वम् समुदिता।
नां चेत्यादिविकल्पग्रासास्पदत्वमतेऽपि दोषः तत्र वर्णोत्पादकत्वेनाभिमतवा
युसंयोगानां प्रत्येकं व्यंजकत्वं समुदितानां वेति विकल्पसंभवादिति चेत् उच्यते प्रत्येक
मेव संयोगाभिव्यंजकाः एवं तत्केचिद्वर्णेन केचिद्वैवेन केचिद्विसर्गेणेनेत्येवं केः।
प्रकारैः अत एव वर्णानां तदतिरेकास्वीकारेऽप्युपपद्यते एवं चाव्यवहितोत्तरत्वसंबंधेन
[illegible] वर्णविशेषकारेण हते एतादृशपदज्ञानकरणतायाश्चाविवादा
त् एवं तत्र व्यवहितोत्तरत्वसंबंधेन ज्ञानाधिकरण [illegible] क्षणोत्पत्तिकज्ञानविषयत्वं वाच्यं
अत एव घटज्ञानानन्तरज्ञानविषयत्वरूपात्पूर्वीस्थ्यादिनैयायिकवृद्धानां व्यव
हारः एवं चैकस्मिन्नेशेषेण एतेन पर्यायस्थलेऽपि एक एव स्फोटो नानावा नाद्यः।
घट पदे गृहीतशक्तिकस्य कलशपदाद्बोधप्रसंगात् न च तत्पर्यायाभिन्न।
क्ते शक्तिग्रहस्तत्पर्यायस्य वर्णार्थधीहेतुरिति वाच्यम् एवं प्रतिपर्यायं शक्तिग्र
हावश्यंभावेन तत्पर्यायस्य शक्तिग्रहे हेतुतायाश्चावश्यकत्वेन तथापि शक्तिग्रह

त्वस्य

ते॰

१०९

तेनैव चैतन्वेलाघवाच्च अन्यथा तत्पर्यायाभिव्यक्तगतशक्तिग्रहत्वेन तत्त्वे गौरवा
दा. त् न द्वितीयः अनन्तपर्यायानां तेषां शक्तिवापेद्यव्यक्तमवर्णांश्च शक्तिकल्पनस्य
लघुत्वादिति परिमलोक्तमपास्तम् पर्यायेष्वनेकशक्तिस्वीकारस्य सर्वसिद्धत्वा
त् तदवच्छेदकानुगमः शक्यत्वोपपादनादिति दिक् । इदानीमितिसाखंडस्फोट
त्वं: निरूपणानन्तरमित्यर्थः अखंडं वाविद्यमानावयवकत्वम् वर्णानामप्यवय
वाघटितत्वस्य सिसाधयिषितत्वादाह व्याजेनेति वर्णानां दृष्टान्तत्वोपपन्नयेय।
या श्रोत्रान्तर्भावेणामलं व्याचष्टे यथेति विविद पृथग्भाव इति यात्नप्रकृतिक
.. वर्णनभावसाधनप्रविविक्तशब्दार्थः पृथग्भावो भेदे पर्यवसन्नीत्याशयेनाह
भेद इति तत्पदादिप्रतीतौ तदवयवानामनुपलभ्यमानत्वात्कथं तदसत्त्वमत
आशयं स्फुटयति अयमित्यादि अखंडमेवेत्येवकारस्य व्यवच्छेद्यं स्पष्टयति
नत्विति ननु काकारैकारादिप्रतीतिरेव तन्नत्वमानमत आह ननु ह
यौति वैजात्यमेमानमाह वर्णजनकताया इति व्यञ्जकताया इत्यर्थः इति।

लं
ष
२०

सतावादिमते अभिव्यक्तिजनकतायावेत्यर्थः आदायैवेति पदादिस्फोटस्या
रोप्यैवेत्यर्थः वैजात्यारोपेवाचस्पतिमिश्रसम्मतिं दर्शयति सप्रमिति उक्तमिश्र
नेनान्वितम् भासमानत्वात्मकग्रहेकवायुसंयोगएवेति कोष्ठताल्वाद्यभिघातात्
तत्तावायुसंयोगएवेत्यर्थः एवकारेणवर्णात्मकस्फोटव्यवच्छेदः साक्षात्सं
बन्धस्यवाचकतावच्छेदकस्यैलाघवात् तथाचसएवकार्यात्मकोऽस्त्वित्या
शः समाधत्ते प्रत्यक्षेति भावः प्रत्यक्षेणोपलब्धेर्हि ककारादेर्बोधकतानम्भ
यते यदिससंयोगात्मकः स्यात्तदातस्यातीन्द्रियत्वेन ककारं शृणोमीति प्रत्यक्ष
सिद्धासाक्षात्कारविषयतानस्यान्नातोनतस्यतदात्मकत्वेति उपसंहरति न
थ्याचेतिवाचकत्वानुपपत्तेरिति एवकारार्थो वर्णानां समूहरूपत्वे उक्तरीत्यावर्ण
समुदायस्यत्वेनवाचकत्वप्रदानुपपत्त्येत्यर्थः उक्तरीत्या समूहस्याप्युपपादना
वाचकत्वानुपपत्तिरत आहप्रत्यभिज्ञेति भवन्मतेवर्णानामनित्यत्वेनत्वा
क्यभेदावगाहिप्रत्यभिज्ञानुपपत्त्यावेत्यर्थः अखण्डस्फोटवादिनामस्माकंत

स्फोटस्यनित्यत्वाङ्क्रप्रत्यभिज्ञास्वपपादेतिभावः एतेनेति प्रत्यभिज्ञानप।
पत्तिसिद्धावेवस्फोटस्यवाचकत्वव्यवस्थापनेत्यर्थः अपास्तमित्यन्तपि अ
नत्वभवादित्यनेन नत्रप्रमाणाभावःप्रतिपाद्यतेऽप्रमाणानामेवेत्यनेनस्फो
टस्यवाचकत्वव्यवच्छेदः तेषांगादिवर्णानांस्फोटातिरिक्तेति गत्वादिप्रका
रकप्रतीतिविषयस्फोटस्यैवगकाराद्यात्मकतयातस्यैववाचकत्वस्यास्मा।
भिरुपपादनादितिभावः कैयटमतमाह यद्विति क्रमिकाणामपिपदा
नांसदावस्थानादाह आशुतरेतितत्तीयदशाणावृत्तिक्षणप्रतियोगिनामि।
त्यर्थः आशुतरविनाशिनामपिसदोत्पन्नानांसमुदायसंभवाङ्क्रम् अ
भवतामिति असंभावेवेतिविषयतयाप्रत्यक्षेतादात्म्येनविषयत्वेन
तयाप्रकृतेप्रत्यक्षेसमूहरूपविषयस्यैवाभावादितिभावः पूर्वपू।
र्वेति पूर्वपूर्ववर्णानुभवजसंस्कारसहकृतश्रोत्रावच्छिन्नसमवायात्म
कसन्निकर्षेणजायमानानितमवर्णप्रत्यक्षंपदघटकसकलवर्णविष।

ल. द. १०८

यत्कंसदेवव्यपदेशत्वमितिरीत्यासंभवन्नित्यर्थः अतिप्रसंगाइति सर्वः श्रा
वणत्वकमकाररेफानुभवजन्यसंस्कारसहकृतनिरुक्तसन्निकर्षजन्यत्वस
मवर्णाविसर्गप्रत्यक्षस्योभयत्राविशेषात् ततेरसबोधापत्तिरित्यर्थः नादाभि
व्यंग्यइतिखण्डनगतवर्णाभिव्यंग्यइत्यर्थः अर्थवदितिवर्णानाद्वदितइत्यर्थः उ
पपादितत्वादित्यस्य सार्वेडस्फोटनिरूपणावसरइत्यर्थः नादस्याप्रत्यक्षस्या
निसवर्णाश्रोलौकिकस्यपूर्ववर्णाश्रोलौकिकस्यसत्वेरसस्यत्याद्यनतिप्रस
क्तस्योपपादितत्वादित्यर्थः अनतिरिक्तस्यवाचकत्वेदूषणमाह वर्णानामि
ति विकल्पेतिप्रत्येकव्यंजकत्वेप्रथमवर्णादेवतदभिव्यक्तौतदितरवर्णो
च्चारणानर्थक्यमनतिप्रसंगश्च घटपदान्तनबोधापत्तिरूपः समुदायस्य
तत्क्रमीत्याउत्पादत्वेनतस्यव्यंजकस्यव्यंजकत्वासंभवोयतेनइत्यर्थः
ननुप्रत्येकंवायुसंयोगानांव्यंजकत्वेपियोवितिस्फोटोच्चत्वेनत्वेनचाभि
व्यंजेतेमतत्राह प्रतपंचेति तथाचविलक्षणवायुसंयोगस्यतत्त्वरूपेणव्यं

९०४

जकत्वोपगमादेवेत्यर्थः तदतिरेकेति तत्तत्संयोगादेवकत्वादिप्रकारकक
कारविशेष्यकप्रतीत्युपपत्तौ स्फोटातिरिक्तत्वकल्पने मानाभावादिति भावः
ननुसंयोगस्यैक्यादावतिप्रसंगस्तद्वत्स्यैवसत्वादित्यतआह ककाराद्यात्मक
स्फोटाभिव्यंजकानां वायुसंयोगानामुभयत्रैवोत्पादतआह एवंचेति तथा
घटत्वेन प्रतीयमाने टकारात्मके स्फोटे घत्वप्रकारकप्रतीतिविषयत्वात्म
कस्फोटत्ववद्भिन्नोऽन्तरत्वग्राहकघटपदविषयता यथा तथात्मके स्फो
टप्रकारकप्रतीतिविषयात्ववद्भिन्नोऽन्तरत्वग्रहे सत्वः एतत्ववद्भावविषयतेति
नभरत्रात्मकस्फोटस्वरसरूपेणेति भावः ननु तत्तन्मतेन गकारादिवर्णस्य स्फो
टरूपतयानियतत्वेन तत्तद्धर्माधिकरणानुगतानिकत्वविशिष्टतदधिकरणात्व
धर्माधिकरणेऽनुगतानिकुत्वरूपावच्छवद्भिन्नोऽन्तरत्वासंभवात्कथमुक्तप्रकारः सं
भवदुक्तिकोऽतआह एवंविति तथा च नित्यत्वादिमतेऽपि वर्णाभिव्यक्तेरनि
त्यत्वोपगमेन सर्ववर्णाभिव्यक्त्यावद्भिन्नोऽन्तरत्वस्य वर्णान्तराभिव्यक्तौ निराबा

ल॰ द॰ २०५

२०९

र्थत्वेनतदादायचत्वादिपदघटत्वयोपपत्तिर्नविरुध्यतइतिभावः अतएवेति अभि
व्यक्तिनिरूपिताव्यवहितोत्तरत्वमादायैतादृशाव्यवहितोपपत्तेः सर्वसम्मतत्वा
देवेत्यर्थः एवेनेति वर्णानुपूर्व्यवच्छिन्नस्फोटस्यवाचकत्वव्यवस्थापनेनेत्यर्थः
तृतीयान्तमयात्मत्वमित्यनेनान्वितम् स्फोटइतिवाचकत्वेनाभिमतोखंडः पदा
र्थइत्यर्थः नाघइतिनैकइत्यर्थः तस्यैतदूषणमाद्यघटपदइतिघटइत्यानुपू
र्व्यवच्छिन्नस्फोटेघटइतिशक्तिकस्येत्यर्थः कलशपदादित्यस्यापघटइतिनतदव
च्छिन्नस्फोटशक्तिकादित्यादिः बोधप्रसंगादितिघटबोधप्रसंगकारणताका
कलशइत्यानुपूर्व्यवच्छिन्नस्फोटस्यानिमित्तकरूपत्वेनतदानीमभावात्पदस्यवर्ण
समुदायरूपस्यवाचकत्वेतुनोक्तदोषइतिभावः पर्यायधीप्रसंगेति उक्तस्थले
वस्फोटस्यकलशपदरूपपर्यायाभिव्यक्त्यवच्छिन्नशक्तिग्रहविषयत्वाभावात्पर्या
यधीप्रसंगइतिभावः एवमिति तत्पर्यायजन्यशाब्दबोधेतत्पर्यायाभिव्यक्त्य
वच्छिन्नशक्तिग्रहस्यहेतुत्वाभ्युपगमइत्यर्थः शक्तिग्रहेति अभिव्यक्तिसंबंध

नस्फोटेनपर्यायस्यविशेषणतयानानात्वेनाविशेषणोतिन्यायेननचशक्ति।
ग्रहस्यावश्यमभ्युपगंतव्यत्वादितिभावः गौरित्यमेवार्हनघासनीतिशक्तिग्र
हवैनैवेति नतपर्यायधर्मिकशक्तिग्रहवैनैवेत्यर्थः एवकारव्यवच्छेद्यंस्प
ष्टीकुर्वंस्तत्पदेगौरवत्तानरूपबाधकमप्याह अन्यथेति उक्तरूपेणाद्वैतत्वा।
नंगीकारइत्यर्थः नद्वितीयइति पर्यायस्थलेनानात्वमितिपदेपिनेत्यर्थः लघु
त्वादिति तथाचवर्णातिरिक्तस्फोटकल्पनमन्याय्यमितिभावः पर्यायेष्विति
एकधर्मावच्छिन्नशक्तिबोधकविभिन्नानुपूर्वीकपदेष्वित्यर्थः अनेकेति नम
पर्यायरूपधर्मिभेदभिन्नेत्यर्थः सर्वसिद्धत्वादितितथाचपर्यायेषुशक्तिकल्प
नानास्त्वेवेतिनोक्तदोषः अयंभावः वर्णाःस्फोटाभिव्यंजकाइतिपक्षेभवदुक्त
दूषणावसरोनतुवर्णानांस्फोटानतिरेकपक्षेतत्रपृथक्शक्तिकल्पनायाअसं
भवात् पर्यायशक्तिग्रहकार्यतावच्छेदककोटाववश्यवहितोत्तरत्वनिवेशेन
व्यभिचारवारणात्उभयोःसममिति नतुमन्मतेस्फोटानतिरेकेणवर्णानांनि

तो

ल
द
२१

त्वान्नैरूप्यान्नेषु चदिनाव्यवहितत्वसंबंधेन एवं एवं वर्णा वनरूपशक्तिका
वच्छेदकानुपूर्वीसंभवइत्याशंकायां एवंक्रमाव्यवहितोत्तरत्वसंबन्धावयति तदवच्छेदकेतिपूरक
ताव च्छेदकेत्यर्थः प्रागिति स्वाभिव्यञ्जकव्यधिकरणातीतोत्पत्तिकाभिव्यक्तिविषयत्व
मितिग्रन्थेनेतिशेषः ननु वर्णानां नित्यत्वपक्षेनैवशाब्दबोधप्रयोजकत्वमित्याह स्फो
टकार्योपपत्तावपि इ स्फोटासिद्धिः आनुपूर्व्याभवइक्रमीमेवतत्रसंभवादत
आह दिशीति तदर्थस्तु यदि स्वतंत्रानित्यावर्णाः स्युस्तदा वैनः स्फोटान्यथासिद्धि
स्तथैव न किं तु कत्वादिना वायुसंयोगधर्मेण प्रतीयमानः स्फोट एव ककारादि
वर्णा इत्युक्तैस्तैरन्यथासिद्ध्यसंभवात् अत एवाने न वर्णकल्पनाप्रयुक्तगौरवशं
कानेति स्फोटसाधिका २ शब्दकौस्तुभे तु वर्णमालायां पदमिति प्रतीतेर्वर्णा
तिरिक्त एव स्फोटः अन्यथा कपालातिरिक्तघटासिद्धिप्रसंगश्चेति प्रतिपादि
तम् १ प्रतीतेरिति अन्यथा वर्णपरम्परारूपमालायास्तत्समूहरूपपदानति
रिक्ततया धाराधेयभावावगाहित्वेन तदनुपपत्तेरित्यर्थः अन्यथेति प्रतीतेः प

२१

वैस्माले घट इति प्रतीत्यभेदावगाहिन्या तत्सिद्धिः। तस्यासाधकत्वेतु घट॰

दार्थासाधकत्व इत्यर्थः स्याप्यसिद्धिः स्यात् कपालतत्संयोगविशेषेणैव तादृश
प्रतीतेरुपपादयितुं शक्यत्वादिति भावः तथाचस्वविनाकृतिबीजेन वर्णातिरि
क्तस्फोटानंगीकारे येन तदनुपपत्तिः यावदेक्यावच्छिन्नवर्णानां मालापदार्थ
त्वेन तत्रानुपूर्वीरूपपदस्याधाराधेयभावप्रसंगात् घटकपालादीनां विनाशी
यकारणजन्यत्वेन तद्भेदस्य प्रत्यक्षसिद्धस्यापि लक्षयितुमशक्यत्वादिति स च
स्फोटो मध्यमायां योनादो यः सर्वप्राणिहृदयस्थः स एव शब्दब्रह्मपदव्यपदेश्यः पर
श्यायां प्रत्यक्षस्तस्यैवाव्यक्तत्वापिहितकर्णेन श्रूयमाणो विंदोक्तस्मादिहमाना
द्ववो व्यक्तात्मको भवत् स एव श्रुतिसम्पत्तेः प्राक् ब्रह्मेति गीयत इति पुराणप्रसि
द्धस्तत्वदर्थोऽलेखप्रतीतिविषयः पदार्थ इत्यन्यत्र विस्तरः ९९ १ नत्वेवं शास्त्रा
प्रामाण्यप्रसंगः पदस्याखंडत्वात् शास्त्रस्य च प्रकृतिप्रत्ययाभ्यां पदव्युत्पादन
मात्रार्थत्वादित्याशंकां समाधत्ते पंचकोशादिवत्तस्मात्कल्पनैषा समाश्रिता उ
पेयप्रतिपत्त्यर्था उपायाव्यवस्थितिः उपेयप्रतिपत्त्यर्था इत्यंतेनानाव्ययः सुपं भा

ल॰
द॰
२११
211

वः भगवन्तं भृगुर्वै वारुणिर्वरुणं ब्रह्म पृष्टवान् स उवाचान्नमिति तस्योत्तमा
दिकं बुद्ध्वा पृष्टे प्राणमनोविज्ञानानन्दानां तदात्मकपंचकोशोत्तरं ब्रह्मपुच्छं प्र
तिष्ठेति तैत्तिरीये ब्रह्म प्रतिपादितम् तत्र कोशपंचकव्युत्पादनं श्रुत्यर्थाद्ब्रह्मबोधना
य एवं प्रकृतिप्रत्ययादिव्युत्पादनं वास्तवस्फोटव्युत्पादनायैवेति ननु प्रत्यक्षस्य
स्फोटस्य श्रवणादिनापि बोधसंभवान्न शास्त्रं तदुपाय इत्यत आह उपाया इति उ
पायस्योपायान्तरादूषकत्वात् तथा च व्याकरणाभ्यासजन्यज्ञाने वैजात्यं कल्प्य
ते मंत्रजन्यमिवाद्यस्मरणे वेदान्तजन्यमिव ब्रह्मज्ञाने तस्य च ज्ञानस्य यज्ञादी
नामन्तःकरणशुद्धाविव शरीरादिशुद्धावुपयोगः साक्षात्परम्परया वा स्वर्ग
मोक्षादिहेतुत्वं च तदुक्तं वाक्यपदीये तद्द्वारमपवर्गस्य वाङ्मलानां चिकित्सि
तम् पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते इदमाद्यं पदस्थानं सिद्धिसोपान
पर्वणाम् इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः अत्रातीतविपर्यासः
केवलामनुपश्यतीति तथालीकया प्रकृतिप्रत्ययकल्पनया कथं वास्तवस्फो

द्बोधः तस्यालीकत्वासिद्धेर्वेदत्वमाणत्वात् एवंशेषाभावयन्याय आदिनागृह्य
ते १ एवमिति उक्तस्फोटस्यैववाचकत्वस्यार्थः अप्रामाण्यप्रसंगमेवैव पादय
ति पदस्येति वाक्यस्याप्युपलक्षणमिदम् अखंडत्वादिति प्रकृतिप्रत्ययाभ्यांय
थुपादनेतन्मात्रप्रयोजनत्वादित्यर्थः तथाचप्रकृतिप्रत्ययप्रस्कारेणपदार्थश
क्तिप्रतिपादकस्यास्यशास्त्रस्यपदस्याखंडस्फोटरूपत्वेप्रामाण्यापत्तिरितिपर्यव
सितोर्थः सत्वउपेयप्रतिपत्त्यर्थेति लिंगवचन विपरिणामेनैपायाइत्यनेनाप्य
भेदेनान्वेति उपेयस्यबोधनीयस्यप्रतिपत्तयेबोधायेषाकल्पनाम्रनिनाश्रितेति

दृ॰

शेषः तत्रोपात्तेपंचकोशादिदृष्टांतस्वीकारोक्तिविशदयति अयंभावइति पंच
कोशाद्युत्पादनेभृगुवल्ल्यामानंदवल्ल्यांच तत्रभृगुवल्ल्यांपंचमस्यैवब्रह्मत्वबो
धनात् पंचानांदृष्टान्तत्वनसंभवतीत्यभिप्रेत्य आनंदवल्लीस्थपंचकोशानांप्र
कृतेदृष्टांतत्वमाह उपायाइति तत्रन्यादिपंचकोशाउपायाएव किंतुब्रह्मपु
च्छंप्रतिष्ठेत्यत्रश्रूयमाणब्रह्मपदस्यैवमुख्यब्रह्मपरत्वात् अतएववाचार्थकः९

ल॰
द॰
२१२

212

छ्वाद्वोऽपिसार्थकोभवति तस्यलोगरलक्ष्मपणश्रवणार्थेबाधादित्यादिनतएवात्रसे
येयम् एवंचयथान्नपंचकोशश्रवणप्राणमनोविज्ञानानंदमयसंज्ञावास्तवत्र।
त्वबोधनोपायत्वेनोपात्तास्तथेदाप्यवास्तवप्रकृतिप्रत्ययवाचकत्वमुत्पादनंवा।
स्तवस्फोटनिष्ठवाचकत्वबोधनायेतितत्पाद्याश्रमात्पितज्ञानत्यर्थविषयीभूतार्थो
बाधादितिभावः श्रवणादीत्यादिनामननादिसंग्रहः तथात्वमिति एतच्छास्त्रं
विनापिस्फोटश्रवणादिभ्यस्तद्वैयर्थ्यमित्यादितिभावः उपायांतरादूषकत्व
मेवदृष्टान्तोपन्यासेनसाधयति तथाचेति वैजात्यमितितथाचस्फोटज्ञानत्वेन
कार्यतावच्छेदकेकिंतनज्ञानेवैजात्यंतदवच्छिन्नंचतोपायान्तरादितितत्वाभि।
वारइतिभावः वैजात्ये दृष्टान्तमाह मेघजन्यमिवेति जन्यपदंजन्यतावच्छेदकप
रम् एवमग्रेऽपि ततपुरुषार्थसाधकत्वसंपादनवैयर्थ्यमतआह तस्यैवेतिस्फो
टज्ञानस्येत्यर्थः यज्ञादीनामिति यज्ञोदानंतपः कर्मेतिस्मृत्युक्तानामित्यर्थः शा
रीरादीत्यादिनावाक्परिग्रहः ततपुरुषार्थतदुद्देशेनापिप्रकृतिर्भूतदैवेत्यतआह

साक्षादिति साक्षात्स्वर्गहेतुत्वं परम्परया मोक्षहेतुत्वं चेत्यर्थः स्वर्गहेतुत्वे भाष्य
पठितैककृत्स्नाद्युक्त्यादिश्रुतिः मोक्षहेतुत्वे च वेदब्रह्मणो विविदिषन्तीति श्रुतिः प्रमा
णम् परम्परा यदर्थं चात्मनस्तत्त्वज्ञानेन तमेवेति श्रुत्या साक्षान्नेदि तस्य मोक्षहेतु
त्वं च विवेकेदानश्रावस्फोटज्ञानस्य पुरुषार्थत्वेऽपि पुरुषार्थोपायत्वेन तद्धेतो
न प्रवृत्तिः सुखदेवेति भावः उक्तार्थे हेतुं सम्मतिमाह तदुक्तमिति तत्त्वादात्म
कस्फोटप्रतिपादकं शास्त्रमपवर्गस्य मोक्षस्य द्वारं तदुपयोगीत्यर्थः तद्धेतु
गर्भं विशेषणम् वाङ्मलानामिति वाङ्मलकर्मकापनयनसाधनमित्यर्थः
मनःशुद्धौ यज्ञादीनामिव वाक्शुद्धावेतस्योपयोगात् योगेन चित्तस्य पदेन वा
वाचि मत्याश्ववाक्यादिति भावः पवित्रमिति यतः सर्वविद्यानामप्येपवित्रम्
तोऽपि विद्यम् विद्यास्वप्रकर्षेण दीप्यत इत्यर्थः तदुक्तेनैषां वसामग्र्यनुषांप
वित्रमद्वेषयोर्व्याकरणं निराहुरिति इदमिति सिद्धिसोपानपर्वणामप्यह
देवप्रथमं पादत्वा माधिकरणमित्यर्थः अत्रस्फोटेत्तीत विपर्यासेऽभ्रान्तिः स्वप्नः

ल॰ टं॰ २१३

केवलोपयाख्यामाधेशाहृदेवत्वं ग्रन्थपश्यति योगजधर्माख्यसन्निकर्षेणाप्रत्यक्षी
करोतीत्यर्थः तथाच योगिनसिद्धौ किमवशिष्यते तत्वज्ञानइतिभावः वक्ष्य
माणत्वादिति पंचकोशादिवत्प्रकृतिशब्दयविभागस्यापिमायिकत्वेनतत्वाय
त्वामस्त्वपशृंगादिवदलीकत्वमितिवक्ष्यमाणशायत्वादित्यर्थः आदिनेति पंच
कोशादिवदित्यत्रोपात्तेनादिपदेनेत्यर्थः रोप्यागवयेतिप्रवाक्तत्वस्यापितस्य
यथावाक्तत्वगवययवोधकत्वतदृदितित्दृष्टान्तइत्यर्थः २ उत्पत्तिविनाशप्रतीति
सात्विकवर्णानामनित्यत्वम् स्फोटस्यतदनतिरेकेत्वतस्यानित्यस्यानित्यत्वापा
त्तिरित्याशंकासमाधानपरतयामूलमवतारयति २ ननुस्फोटस्यवर्णाजाती
नांचनित्यतयाककारउत्पन्नइतिनस्यात्वायुसंयोगनिष्ठजातेः स्फोटेभाने
कादिप्रतीतीनांभ्रमत्वापत्तिरित्यतआह कल्पितानांस्वपार्थिवत्वीकृतेद्विपत्वे
ऽपि स्वरदेवाघ्याघ्यपित्व मैवगोभ्योत्पत्तमवते स्वीकारस्थलमाह स्वरदेवाघ्या
घ्यपीति आदिनोत्पत्तिविनाशादिसंग्रहः उदात्तादिवर्णनिष्ठेनतस्यनित्यत्वात्

२१३

पकत्वाच्च तस्य तत्पर्यायमितिप्रत्यभिज्ञानात् तद्गत्वावच्छिन्नप्रतियोगि
ताकभेदाभावस्तद्विषयः अंशांशाभेदस्यापि भासमानस्य विनाबाधकस्या
गायोगात् नचोत्पत्तिप्रतीतिर्बाधिका प्रागसत्त्वे सति सत्त्वरूपाया उत्पत्तेर्व
र्णेषत्वसम्भवविरुद्धत्वात् अतएव वर्णानुच्चारयतीति प्रत्ययो न तूत्पादयतीति।
तिप्रत्ययोव्यवहारश्चउच्चरितं तेनैव ताल्वोष्ठसंयोगादिजन्याभिव्यक्तिविशि
ष्टत्वम् किंचवंशगकत्वनिनिष्ठान्त्यादेः परम्परयावर्णनिष्ठत्वाविषयत्वे।
नाप्युपपत्तेर्नेत्यातिरिक्तवर्णसाधिका परम्परयावर्णनिष्ठत्वाभ्युपगमा
च्चनत्रमत्वम् मात्रांशेवयांशेभ्रमः इत्यवशिष्यते तदपि मायमिन्यत्रव्यक्त्या
भेदांशेन वभ्रमत्वमल्पम् परं तत्समातिरिक्तवर्णतत्त्यागाभावप्रसङ्गकल्प
नानैतिलाघवमतिरिच्यते नच वर्णस्थले खण्डितसत्त्वेमानाभावः तद्व्या।
दकपाख्यायभावेन तदसंभवश्चेति वाच्यम् ककारादुच्चारणस्थलेन त
स्यानत्सत्त्विहृयादिषदं तरपानेवर्णानुत्पत्तेर्ध्वस्य [illegible] त्वस्यैवस्वदर्शनात्।

त० द०
२१४
214

द्वाभिघातजवायुकण्ठसंयोगादेर्ध्वनिजनकत्वकल्पनात् तस्य च वर्णोत्पत्ति
स्थलेपि सत्त्वाज्जैवेव प्रतिबन्धप्रतिबन्धकभावकल्पना निष्प्रामाणिकी स्यादि
ति गौरवं विपरीतम् एवं परस्परविरोधाद् उदात्तत्वानुदात्तत्वह्रस्वत्वदीर्घत्वा
दिकमपि न वर्णनिष्ठमिति तेषामभिप्रायः एवं चोत्पन्नादिप्रतीतीनां तन्य
मानत्वस्य च निर्वाहः परेषामपि च समानः इति प्रतिवेदितं द्रष्टव्यम् इति भावः ॥
९० वर्णजातीनामिति ककाराद्यात्मना भासमानस्फोटाभिव्यञ्जकसंयोग
वृत्तिवैजात्यानामित्यर्थः तस्यादिति उत्पन्नेन श्रोत्रा ककार इत्यादिप्रतीतेः
ककारादिवर्णात्मकः स्फोटः कत्वादिजातिर्वा तस्यादिमत्त्वेन विषयो वा
ध्यानं च तथा सम्भवति द्वयोरेव नित्यत्वात् जायमानतायास्तस्या विषयत्वाधे
न भ्रमत्वापत्तेरिति भावः इत्यापन्नत्वाद्वायुसंयोगेति कादिप्रतीतीनां क
कारो गकार इत्यादिप्रतीतीनां भ्रमत्वापत्तिरिति कत्वाद्यभाववति स्फोटे भ्रम
वाये न तेषां नाभिविषयीकरणादिति भावः इत्यनेन स्फुटीकृतमाहोदात्त

नमा

त्वादीति आदिनानुदात्तत्वसंग्रहः वर्णावृत्तिभेदेनमाह तस्येति अत्वादिविशि
ष्टवर्णस्येत्यर्थः एकत्वादिति स्वसजातीयनिष्ठभेदप्रतियोगितानवच्छेदकध
र्मवत्वादित्यर्थः स्वरूपासिद्धिविरासायाहनित्यत्वाश्चेति उदात्तत्वानुदात्तत्वयोः
परस्परविरोधाद्वर्णाभेदेन तन्मनावाव्यावर्णभेदस्यतदनित्यत्वस्यावश्यकत्वसंभव
तीतिभावः नित्यत्वेपिमाह तत्रेति नित्यत्वमनेकत्ववचेत्यर्थः त्यागायोगादिति
अविषयत्वायोगादित्यर्थः बाधकेनित्यत्वभेदप्रतीतिबाधिकेत्यर्थः आगमत्वे
सतीति स्वाधिकरणकालध्वंसाधिकरणकालावृत्तित्वस्वरूपायाइत्यर्थः अत
एवेति निरुक्तरूपाया उत्पत्तेर्वर्णेष्वनुभवविरुद्धत्वादेवेत्यर्थः अन्ययोगानेत्व
वहारः शाब्दप्रयोगः तत्त्वारणमपि तदनुकू[illegible]लव्यापारएव तथाचसैवप्र
तीतिर्वर्णानित्यत्वसाधिका भवष्यतीत्यतआह उच्चरितत्वेचेति अभिव्यक्तिवि
षिष्टत्वम् तद्विषयत्वम् तथाच तादृशप्रतीत्याभिव्यक्तिनिष्ठवर्णानिरूपित
विषयित्वमेवविषयीक्रियते नतुव्यक्तिनिष्ठवर्णावृत्तित्वमितितस्यानित्यत्वसा

त. द.
२१५
215

थिकेतिभावः ननु वर्णाभिव्यक्तिजनकः कंठताल्वाद्यभिघातप्रयोज्योच्चारणपदा
र्थो न वर्णोत्पत्तिजनकस्तत्रैव किं मानं किं च वर्णानित्यत्ववादिनामप्युत्पत्तेर्वर्णेषु
त्पादयतीति प्रयोगः स्यादेवेति तन्नानुभवविरोधोपीत्यत आह किं चेति उत्पन्ना
देरित्यादिना विनष्टो वर्ण इति प्रतीतिसाक्षिको विनाशः संगृह्यते परम्परया स्वा
श्रयत्वनिरूपकत्वरूपया नातिरिक्तेति वर्णानित्यत्वसाधिकेत्यर्थः ननु ध्वनि
धर्मस्यादेस्तादृशप्रतीत्या वर्णेष्ववगाहनेन तस्या भ्रमत्वापत्तिरत आह परम्प
रयावर्णेति तथा च स्वाश्रयसंयोगसंबंधेन स्फटिके लौहित्यावगाहिन्या
तथा भ्रमत्वं तथास्या अपीति भावः स्वविशिष्ट उत्पन्नस्योत्पन्नो वर्ण इति प्रती
तेरिति भावः ननु तादृशप्रतीतेर्नियमेन परम्परासंबंधविषयकत्वे गौर
वमत आह परं त्विति अतिरिक्तेति अनेकेत्यर्थः तथा चानेकवर्णानां ध्वंसादि
कल्पनापेक्षयोक्तप्रतीतेर्नियमतस्तादृशसंबंधावगाहित्वकल्पने लाघ
यमीतिभावः हेत्वभावादपि न तदानीं तत्सत्वमित्याह तदुत्पादकेति शंको

ष्ठाभिघातजवायुसंयोगादिभावेनेत्यर्थः वर्णानुत्पत्तेरिति वर्णानभिव्य।
क्तेरित्यर्थः दर्शनादिति दृशिरत्र ज्ञानसामान्यार्थकः तथा च पार्थक्येनानु
भूयमानायाः प्रतीतेर्जिह्वाभिघातकण्ठवायोः संयोगादेस्तद्धेतोः सत्वान्नव।
र्णाभिव्यक्तिस्थले खत्वनैयत्यमित्युक्रम् संबंधविषयकप्रतीतेर्नानुपपत्ति
रिति भावः तथैवेति वर्णस्थले खत्वसत्ववादिन एवेत्यर्थः विपरीतगौरवमि
ति स्वकारणबलाज्जायमाने खत्वे वर्णोत्पादकसामग्र्याः प्रतिबंधकत्वकल्प
नात्खत्वकल्पनप्रयुक्तलाघवापेक्षया विपरीतगौरवमित्यर्थः तेषामिति व
र्णनित्यतावादिनां मीमांसकानामित्यर्थः एवं चेति उत्पन्नादीनां वर्णानां वृत्तित्वे
च सिद्ध इत्यर्थः प्रतिबंधेवेति परामिमतसमाधेयार्थकवाक्यप्रतिबंदिरित्ये
त्यर्थः तथा च तत्र मीमांसके कत्वसत्वादिप्रतीतेः समाधिराश्रितः स एवास्मा।
भिरप्यनुसर्त्तव्य इति भावः मीमांसकानामनुष्ठानोपयोगिपदपदार्थविचार
त्वकाल्पनिकप्रकृतिप्रत्ययतदर्थमादायैवेति न तदनुपपत्तिः एवं चावेद

ल॰
द॰
२१९

216

पदेकासिद्धौ नाकिं विबाधकमित्यनुपदोक्तप्रकरणार्थ इत्यधिकमन्यत्र निरूपि
तेनेन न पुनर्वावथायम् १ इत्थं पंचव्यक्तिस्फोटाः १ इत्थमिति पूर्वोक्तप्रकारैरित्य
र्थः पंचधेति वर्णपदवाक्याखंडपदवाक्यभेदेन भिन्ना इत्यर्थः इति भूषणसा
रलघुदर्पणे व्यक्तिस्फोटनिरूपणम् १ श्रीगणेशाय नमः जातिस्फोटमाह
शक्यत्वमिव शक्तत्वे जातेर्लाघवमीक्ष्यताम् औपाधिको वा भेदोऽस्तु वर्णानां तार
मंद्रवत् ग्रंथभावः वर्णास्तावद्वाचकाः उक्तरीत्या सोऽयं गकार इतिवद्यो
ऽयं गकारः श्रुतः सोऽयं हकार इत्यपि स्यात् स्फोटस्यैकत्वात् गकारोऽयं न हका
र इत्यनापत्तेश्च किंच स्फोटे गत्वाद्यभ्युपेयं न वा आद्ये तदेव गकारोऽस्तु वर्णा
नित्यतावादिभिरतिरिक्तगत्वानंगीकारात् तथा चातिरिक्तस्फोटकल्पन
एव गौरवम् अंत्ये गकारादिप्रतीतिविरोधः वायुसंयोगवृत्तित्वनिष्ठत्विवा
वैजात्यमारोप्य तथा प्रत्यय इति चेन्न प्रतीतेर्विनाबाधकं भ्रमत्वासंभवात्।
अस्तु वा वायुसंयोगप्रकाकारोऽपि तस्यातींद्रियत्वे दोष इति चेद्धर्मवदुपप

२१९

नैवेति कृतं स्फोटेन तस्मात्संभूयैव वर्णाः पदं न तु वाचका गौरवात् आकृत्यधि
करणन्यायेन जातेरेव वाच्यत्ववद्वाचकत्वस्यापि युक्तत्वाच्च इदं हरिपदमित्यनु
गतप्रतीत्याहूँयुपस्थितित्वावच्छेदेन हरिपदत्वानवच्छेदेन हेतुतावच्छेदकता।
याच जातिविशेषस्यावश्यकल्पनत्वात् न च वर्णानुपूर्व्यैव प्रतीत्यवच्छेदकत्व।
योर्निर्वाहः घटचटत्वादेरपि संयोगविशेषविशिष्टमृदा आकाशादिभिश्चान्य
थासिद्ध्यापत्तेः तस्मात्सा जातिरेव वाचिका तादात्म्येन तु दवच्छेदिका वेति ।
क्रमप्राप्तमितरनेनावसरस्य संगतित्वेन निरूपणीयोच्यते ननु करीत्यास्फो
टातिरिक्तवर्णानामेवासत्वात्तत्तज्जातेर्वाचकत्वविचारो गगनप्रसूनसमोन
इत्याह अयं भावः इति हकारगकारयोरभेदसाधकतद्विचारो गगनप्रसूनसमो
तदिति तदभिन्नाभिन्नस्य तदभिन्नत्वनियमेन हकारात्मकस्फोटाभिन्नग
कारेण तदभेदावगाहिप्रतीतेः प्रमात्वानुपपत्तेश्चेत्यर्थः ननु वर्णात्मकस्फोट
स्यैकत्वेपि गत्वहत्वादिविरुद्धधर्माध्यासमूलकप्रतीतिर्नानुपपत्तिः प्रामा

ण्यबुद्धेः प्रमात्वापत्तिरित्यर्थः अनापत्तेरिति अभेदादेव तत्तद्भेदावगाहि॰

मारुस्फोटस्ये
कत्वादिति॰

ल॰ द॰ २१०

217

त्पन्नत्वस्यावर्णेष्वैकत्वादिमतेन दूषयपरिहृतमेवेत्यत आह किंचेति उपाधिभेदाभिम
तगत्वादीत्यर्थः आधेनत्वगत्वाभ्युपगमेनतदेवगत्वमेव ननु गत्वादेर्वर्णधर्मतया
भेदेनकथंतस्यनदात्मकत्वमत आह वर्णानित्यतेति अनिष्टिकेति नत्वनेधर्मस्य
मिलितारभेदादित्यर्थः गौरवमिति गादिप्रतीतीनां गत्वादिविशिष्टगकारादिवि
षयकत्वेनोपपत्तिसंभवादितिभावः भ्रमस्यैतिस्फोटेगत्वानभ्युपगमइत्यर्थः
विरोधइति गादिप्रतीत्यनुपपत्तिरित्यर्थः गत्वादेस्तद्धर्मत्वेनस्फोटावृत्तितया
तद्विशिष्टविषयकप्रतीत्यनुपपत्तिरितिभावः वायुसंयोगवृत्तीनित्वमते ध्व
निवृत्तीतिमतान्तरे स्वीकृतेस्यानात्तदूर्विवेतान्यारोपणात्प्रतीतेः सूपपादत्वादा
ह आरोपेति भ्रमत्वेनेत्यादितिमात्रात्संबंधेनप्रमात्वोपपत्त्यावाशापिनसंबं
धविषयकत्वेप्रमाणाभावादितिभावः ननु निष्कानेकवर्णकल्पनापेक्ष
यानारदप्रतीतीनांभ्रमत्वमेवन्याय्यमत आह अस्त्वेवेति तथा चैतावतैवप्र
तीतेः प्रामाण्योपपत्त्यावलेस्फोटकल्पनेयेतिभावः तस्यसंयोगस्य अनीदि

यत्वमिति लौकिकविषयताशून्यत्वमित्यर्थः दोषश्चेतिबाधकत्वमित्यर्थः प्रति।
बंधुत्वरूपापत्तिरित्यर्थः धर्मवदिति यथेन्द्रियमात्रवृत्तिधर्मस्य सर्वमते साक्षात्का
रविषयस्यापि तव मतेपींद्रियिकत्ववदतींद्रियसंयोगस्याप्यैंद्रियिकत्वसंभवादित्य
र्थः उपसंहरति तस्मादिति कत्वादिविशिष्टविषयकसाक्षात्कारानुपपत्तिप्रमा

खि॰

णासंभवादित्यर्थः संस्येवेति त्वदभिमतस्फोटातिरिक्ताः कादयः संस्येवेत्यर्थः
तथा च तज्ज्ञानि वाचकत्वविचारोयुक्त इत्यभिप्रेत्याह पदेति किंत्वित्यर्थः गो
त्वादिति तत्तद्धर्मभेदभिन्नानेकशक्तिकल्पने गोत्वादित्यर्थः ननु तावद्वर्णाग
तवैजात्यानुगतीकृतवर्णविशेषकस्याप्यवशेनैकरूपगमान्नत्वतानात्वप्रयुक्तो दो

क॰

षोत आह शक्त्यपीति विशिष्टशक्तिवादिना तावद्दीनविशेषणतान्याये
नज्ञातो शक्तेरेव पुष्पाभ्युपेयतया तद्विषयकशक्तिज्ञानस्यैव ज्ञाने विशिष्टशाब्द।
बोधहेतुत्वमस्त्विति मितितत्त्वनिर्णीतमितितद्दीत्यर्थः ननु तादृशज्ञातो माना।
भावोत आह इदं पदमिति अनुगतधर्मेमनेरूपणाविलक्षणादृशपदेष्टैकाकारप्र

ल॰
द॰
२१८
218

तीत्यनुपपत्तेरितिभावः ननु तद्गतप्रतीतिमात्रस्य जातिसाधकत्वे विभुत्वादेर
पि जातित्वापत्तिः किंतत्कारणतावच्छेदकत्वादिना तत्सिद्धिर्वाच्या शक्तेन दशा
वाक्यार्थं तस्य जातित्वमत आह इत्थं पश्यन्तीत्यादि अन्यथा तावद्वर्णानां तद्व्य।
क्तित्वेनैकत्वतायाव्यभिचारेणासंभवादितिभावः प्रतीत्यवच्छेदकत्वयोरिति अ
नुगतप्रतीतिकारणतावच्छेदकत्वयोरित्यर्थः वर्णानुपूर्व्येति तज्जात्यभिव्यंज
कत्वेनावश्यकल्प्यपूर्ववर्त्तिताकयानुपूर्व्येत्यर्थः तथा च तादृशत्वे जात्येनुद्देतत्वमा
नाभाव इतिभावः अन्यथासिद्ध्यापत्तेरिति न च मेघाप्रमत्तविशेषादितिभावः
ननु तानेः शक्तत्वे जातित्वेशक्ततावच्छेदकं वाच्यम् तथा च गौरवमत आह ता।
दात्म्येनेति अभेदेनेत्यर्थः तथा चैतादृशदोष इतिभावः नार्थैरिति तयोः पदयोः
समानवर्णाघटितत्वेनोक्तजातिसत्वाविशेषाद्वाच्यत्वेन तत्तदर्थबोधापत्तिः।
र्थैरित्यर्थः २ ननु सरोरसइत्यादौ जात्योः सत्वादर्थबोधभेदो न स्यादित्यत आह
औपाधिको वेति वा तैश्च उपाधिरानुपूर्वीमेव जातिविशेषाभिव्यंजकेति भेदः।

कारणीभूतज्ञानस्येतिनातिप्रसंग इति भावः उपाधिप्रयुक्तज्ञानवैलक्षण्यप्रद
र्शनमाह वर्णानामिति ९८ । वाक्याद्दूष्यपदांतरपरत्वभ्रमनिराकरणेति वा
नर्थ इति अव्ययारणाइतियावत् तथाच तत्रवर्णानांनिप्यानपूर्वीवैलक्षण्येन
रसत्वविशिष्टोपस्थापकतावच्छेदकज्ञानेनिरुक्ताव्यवहितोत्तरत्वसंबंधेनरविशि
ष्टसत्वादिरूपानुपूर्व्या एव व्यंजकत्वेन सरः पदादसविशिष्टबोधापत्तिरेवमन्य
त्रापीतिभावः वर्णजातिस्फोटमभिप्रेत्य अवर्णेष्वपिसत्वात्प्रत्येकार्थबोधःस्या
दित्यतआह अनेकव्यक्त्यभिव्यंग्यजातिः स्फोट इतिमते नाकेचिद्व्यक्तयएववाचक
त्वेनस्वकल्पिताः अनेकाभिर्वर्णव्यक्तिभिरभिव्यक्तैवजातिः स्फोट इतिसम
ता योग्यार्थतयाबोधिकेतियावत् एतेनस्फोटस्यानित्यत्वात्सर्वदार्थबोधाप
त्तिरितिनिरस्तम् अयंभावः यद्यपिवर्णस्फोटपक्षे कश्चिन्न दोषोस्ति तथा
पिपदवाक्यपक्षयोर्न तत्र तत्साक्षात्सम्पृक्तं नित्यसाध्यमित्यादृकमानमिदमा
दिति केचिद्व्यक्तयोर्थ्यतयएवधनिर्वर्णयोर्भेदाभावादित्यभ्युपेयतइति शे

दभेः

कृतेनतनुजातेःप्रत्येकं

ष्यार्थः उक्तं हि काव्यप्रकाशे बुधैर्वैयाकरणैः प्रधानभूतस्फोटरूपव्यंग्यव्यंजकस्य श
ब्दस्य ध्वनिरिति व्यवहारः कृत इति ६५ । ज्ञानेति स्फोटज्ञाने इत्यर्थः प्रत्येकेति
पदान्तर्गततत्तद्वर्णेष्वित्यर्थः बोधापत्तिरिति तदभिव्यंजकवर्णसत्त्वादिति भावः
योग्यार्थतयेति स्फुटतया श्रीरामादिति वक्ष्यमाणत्वानुपपत्तेरित्यर्थः एतेनेति नन्वदृ
ष्टकल्पनापेक्षया वर्णाभिव्यंग्यपदज्ञानेर्वाचकताभ्युपगमेनेत्यर्थः सर्वदा पदाश्रवणापि
पत्तेस्तत्रापि ज्ञानेः समानाननुपूर्वकस्थले व्यंजकासमवधानेन तदभिव्यक्त्यभा
वेन बोधस्यापादयितुमशक्यत्वादिति भावः ननु वर्णज्ञानेति स्फोटपदेऽपि पदवदृष्ट
कल्पनाया वर्णगतजातीनामेव बोधकत्वमुपपन्नमित्यत आह एकवर्णगतजातेरपव
र्णानभिव्यंग्यपदत्वान्न तद्वर्णपदाभिव्यंजकोवायस्तथा चोक्तदोषस्तदवस्थ एवे
त्यत आह अर्थभाव इति उक्तदोष इति तथा चोक्तदोषकवलितत्वान्मपदोऽनाश्र
यणीय इति भावः नेत्रेति पदेवाक्ये च तस्याः पदत्वादिज्ञानेः व्यासज्यवृत्तित्वस्ये
ति पर्याप्त्या व्याविलक्षणासंबंधेन वृत्तित्वस्येत्यर्थः ननु ज्ञानेः समवेतत्वस्येव सा

वैचित्र्यकृततयाकथमेतस्याः पर्यायत्वमतआह यस्मिन्नित्यादिकेति यस्मैवनीजातिस्त।
द्वादेकमात्रेपदत्वस्यवाक्यत्वस्यवावाचकतानुपपत्तिस्तस्मिन्नुक्तादित्यर्थः प्रत्ये।
कवर्णविश्रान्तज्ञानेवाचकत्वस्योक्तदोषग्रस्तत्वेनासंभवाद्वाचकत्वान्यथानुपपत्त्या
कल्प्यमानापदत्वादिजातिः यदिपुनः प्रत्येकवर्णविश्रान्तास्यात्तदातत्सिद्धिरेव
नस्यात् वाचकत्वानुपपत्तेरपरिहारादितस्तत्साधकमेवतात्पर्यार्थसाधकम् ए
वंचानेकत्वव्यञ्जकाभिव्यङ्ग्यत्वमस्यानपूर्वावस्थित्वानेकव्यक्तिपर्यायेप्यर्थात्सर्वेसम्भे
नसमितिभावः अस्मिन्नेनयेतिस्फुटत्वाद्वर्णात्मकव्यक्तिरेवप्रकृतेव्यक्तिपदा।
र्थइत्याशयेनाह ध्वनिवर्णयोरिति वर्णानांध्वनिर्नियमादभेदोपचारः अत
एवपस्पशायां अथगौरित्यत्रकः शब्दइतिप्रश्नेलोकेर्थबोधकत्वेनगृहीतोध्वनि
र्वर्णात्मकः शब्दइत्युक्तम् अथवाप्रतीतिपदार्थकोध्वनिः शब्दइत्युक्तमि
तिभावः शेषार्थइतिप्रकृतकारिकोत्तरार्धार्थइत्यर्थः वर्णेषुध्वनित्वव्यवहारे
सम्मतिमाह उक्तंहीति काव्यप्रकाशइति इदमनन्तमतिशायिनिर्व्यङ्ग्येवा

ल॰
द॰
११
220

व्याख्यानिर्वृत्तैः कथितमिति पद्यवर्ण्यव्यावसरस्यार्थः स्फोटवत्त्वेनेति स्फोटरूपं च।
त्वेनेतज्ज्ञानकवर्णात्मकशब्दस्येत्यर्थः ननु पदत्वादेर्जातित्वस्वतन्त्रवाचकत्वव्यवस्था
पनमफलेपुरुषार्थानुपयोगित्वादित्याशंक्य समाधानपरतया मूलमवतार
यति २ ननु का सा जातिरित्यत आह सत्यासत्यौ तु यौ भागौ प्रतिभावं व्यवस्थितौ स
त्यं यत्तत्र सा जातिरसत्या व्यक्तयो मताः प्रतिभावं प्रतिपदार्थं सत्या जातिः अ
सत्या व्यक्तयः तत्र व्यक्तिविशिष्टं ब्रह्मैव जातिरिति भावः उक्तं च कैयटेन अ
सत्योपाध्यवच्छिन्नं ब्रह्म तत्त्वं द्रव्यशब्दवाच्यमित्यर्थः इति ब्रह्म तत्त्वमेव शब्दस्वरू
पतया भातीति च कथं तर्हि ब्रह्मदर्शने च गोत्वादिज्ञानेत्यस्य सवादनित्यत्वम्।
आत्मैवेदं सर्वमिति श्रुतिवाचनादित्निकयामटः संगच्छताम् अविद्या आविद्य
को धर्मविशेषो वेतिपदत्वात् तस्मादाह येति वृत्तत्वम् १ सा वाचकत्वेनाभिप्रेता जा
तिः केति योजना तत्र सत्यांशो इति तद्यैम ये कालत्रयेऽप्यबाध्यो यो भागः इत्य
र्थः तज्ज्ञानोपायमाह असत्या व्यक्तय इति परमार्थदशायां नाशो वा यादृश। ११

य

पर्यि॰

स्येवं ब्रूमित्याह नन्वव्यक्तीति विशिष्टपदमुपलक्षितार्थकं परमार्थभूतेन ब्र
ह्मणाबाधितव्यक्तीनां वैशिष्ट्यासंभवादतएव जगत्कर्तृत्वादीनां तटस्थत्वीय
त्वेवेदान्तेष्विति ज्ञातिरिति तद्व्यवहारविषय इत्यर्थः उक्तार्थे स्वोत्प्रेक्षितत्वं निर
स्यति उक्तं चेति उपाधित्वं च व्यक्तिषु स्वनिष्ठभेदादिधर्मसंक्रामकत्वम् उपसमी
पेस्थाद्धाति स्वीयं धर्ममिति व्युत्पत्तेः दृश्यते च स्फटिके लौहित्ये जपाकुसुममु
पाधिरित्यत्र स्वनिष्ठलौहित्यसंक्रामकत्वेन जपाकुसुमे उपाधिपदप्रयोगः एवं
व्यक्तीनामपि स्वनिष्ठनानात्वसंक्रामकत्वेन तत्त्वमविकलमितिबोध्यम् ब्रह्म
त्वेवं च ब्रह्मणि तदुपलक्षितत्वम् द्रव्यशब्देति ज्ञातिशब्देत्यर्थः गुणक्रियादिशा
ब्देगुणादीनामनन्तेर्वाच्यत्वादिवदसंक्रमम् शब्दस्वरूपतयेति प्रणवादिनामात्मक
तयेत्यर्थः नानारूपेव्याकरवाणीतिश्रुतेः तस्माद्वा एतस्मादात्मन आ
काशः संभूत इति तैत्तिरीयश्रुतौ ब्रह्मणो जगदुपादानत्वश्रवणादुपादेयस्य चो
पादानाभिन्नत्वस्य सर्वसिद्धत्वाद्वाभाष्ययोरपि स्वाभिन्नोपादानाभिन्नत्वेन परं ब्र

ताभिन्नत्वेनस्यैवलक्षणः साक्षाद्दुत्तरैस्तैर्नैपलक्षणानामरूपनिरूपणाद्वारान्तरा
नेशास्त्रस्योपयोगइतिकथ्यतेआशयः कथमितिसंगच्छतामित्यनेनाविनमत् ने
नज्ञानेदेसत्यत्वप्रतिपादनात्स्वीय [illegible] विरोधादितिभावः मिथ्याज्ञानरूपाविद्या
याज्ञानित्वासंभवादाह आविद्यकइति आह निवारणायपर्मेति तद्यत्किंचाद्दि
वारणापविशेषेति तथाचमतभेदेनार्थद्वयस्यशास्त्रीयत्वप्रदर्शनपरत्वान्नवि
रोधइतिभावः ।। यद्यपिप्रकृतनाविशेषेणावाक्यस्फोटवाक्यज्ञानिस्फोटोसिद्धो
तितेनथापितत्त्वमात्रवेदज्ञानिस्फोटस्यैवतत्त्वेसमतमित्याशयेनमूलमवतारयति
२ तमेवसत्याशास्यपश्यति इतिनिरूप्यमाणायस्तत्त्वस्तत्त्वेनिरंजनम् [illegible] ब्रा
ह्मैवेत्यत्तदेशाद्गुप्तमैष्टर्गामिननमः प्रयेभावः तोमरूपेव्याकरणनीतिश्रुति
सिद्धाद्वयीदृष्टिः तद्रूपेस्यवनान्योपिनदेवनतम् प्रक्रियांशास्त्रविद्याविजृम्भ
णमात्रम् उक्तंचवाक्यपदीयेशास्त्रेषुप्रक्रियाभेदैरविद्यैवोपवर्ण्यते समारंभ
स्तभावानामनादित्वमत्रशास्त्रमितिति इतिश्रीवैद्यनाथेनग्रथायेप्रकरणःस्वयंज्योतिः २२१

ल
द
२२१
221
३

तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति श्रुतिसिद्धस्वपरप्रका

व

शात्मस्वरूपस्फुरणयोग्यत्वादिति योगिकशब्दाभिधेयत्वं सूचयति निर्विघ्नप्रचया
यानेमंगलेस्तुतिनतिरूपमाह एतात्मनइत्यादि १ अयमात्मा तत्सत्यमित्या
दिश्रुतिसिद्धं यत्सत्यं तत्र सामान्यमितिशिष्यनेनोक्तमेवेत्यर्थः मूलइत्यमिति निरवोक्तप्र
कारेण निकृष्यमाणमध्यस्तवाचकेभ्यः शब्देभ्यः पृथक्क्रियमाणं अतएव।
निरंजनमुपाधिनिर्मुक्तम् अतएवाक्षरमविनाशनदादिमध्यान्तविहीनमितिश्रु
तेर्यः सर्वेषु भूतेषु नश्यत्स्वनविनश्यतीतिस्मृतेश्च शाश्वतमितिप्रकृताभि
प्रायेण वस्तुतस्तु अर्थशब्दसामान्योपादानमित्यर्थः यत्त ब्रह्मेति प्राहुः प्रकर्षे
णकथयंति ब्रह्माभेदेनज्ञानमानीतियावदितितदर्थः कथमेतस्य ज्ञानमित्यतो।
दस्यात्मेवोपपदकत्वमित्याकांक्षायामाह अयमर्थ इत्यादि नामरूपे इति अ
नेनजीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीतिश्रुतिसमत्वेमित्यर्थः दृ
श्यो इति नामरूपात्म[illegible]कसवयवममदरूपेत्यर्थः तत्रशिष्ठिद्वयमध्ये रूप

ल॰
द॰
२२३

223

स्येवेति आकाशाद्यर्थज्ञानस्येत्यर्थः नाम्नोपि प्रणवादिशब्दज्ञानस्यापीत्यर्थः
तदेव सद्ब्रह्मैव तत्त्वम् उपादानमित्यर्थः तस्मादेतस्माद्वा आत्मन इति श्रुतेः शा
ब्दतन्मात्रकाकाशोपादानत्वे पर्यवसानाद्द्वयोरप्युपादानं ब्रह्मैव श्रुतएवत
योः परंपरमभेदसिद्धिः स्वोपादानब्रह्माभिन्नत्वात् एवंचोक्तस्फोटस्यप्रणव
स्वरूपस्याकल्पनयापि प्रलयस्तत्पदार्थत्वं तस्यापि बाधाद्ब्रह्मस्वरूपत्वं किंत
पासनाद्वारा तज्ज्ञानस्य परंपरया पुरुषार्थोपयोगित्वम् सद्रूपब्रह्मज्ञानेतस्मा
देव तद्धेतुरिति सप्तात्मकस्फोटस्यैवमुख्यत्वमिति भावः ननु तर्हि शब्दब्रह्मज्ञाने
कथं शास्त्रस्योपयोगो न स्यादत आह शब्दक्रियाशक्तिविति प्रकृतिप्रत्ययव्युत्पादनेनेत्य
र्थः अविद्येति मलिनसत्त्वप्रधानात्मानविलासएवेत्यर्थः तथाचपंचकोशा
दिन्यायेन परंपरया तत्र शास्त्रोपयोगो न तत्साक्षादिति भावः तत्रसंमतिमाह
उक्तंचेति अविद्यैवोपवर्ण्यतेसत्वत्त्वम् उपायाः शिक्षमाणानामिति श्लोकः स
मरेभादिमद्भुतलशास्त्रनमित्यस्य पूर्वार्धेनचयदादिदर्शनाल्लोकः परिच्छिन्नोवसीय २२३
नुभावानामा।

तद्वति तदर्थस्तु यथा घटादिकं दृष्टान्तः सर्वोपि प्रपंचः परिच्छिन्नः सकारणकोऽव
सीयते तन्न दीयते तथाभावानामाकाशादिपदार्थानां समारंभात् सम्यगारंभोज
नत्वं यस्मादिति बहुव्रीहिणा जनकादित्यर्थलाभः भावशब्दानत्रनिर्देशः भावो।
पादानत्वादिति यावत् तदात्मेन त्वा यथा श्रुत समारंभपदार्थोद्देत्तः शाश्वतेनि
त्यमपि ब्रह्म आदिमत्सकारणकमिति वाः वसीयते इत्यनुषज्यते परिणाम्युपादा
नत्वे तस्मिन्नभ्युपगम्यमाने विकारित्वसंभावनापि भवेत् नचैवं विवर्त्तोपादान।
तायाः एव तत्र तत्रोपगमात् दृष्टान्तो प्रातिभासिकभुजंगस्येवेति भावः अयमर्थो
जगदेतद्विवर्त्तते इति वदतो मूलकृतोपि संमतः समारंभस्तु भावानामनादि
ब्रह्म शाश्वतमिति पाठस्तु प्रकृतानुपयोगात् उत्राश्वतपदेनैवानादित्वलाभा।
श्चोपेक्षणीयः ननु नादेपि ब्रह्मपदप्रयोगदर्शनात् स्वरूपार्थोपयोगितन्नादा
व्यत्तानसंपादनानर्थकामत आह ब्रह्मैवेदमिति तथाच प्रकृते ब्रह्मपदस्य
स्वप्रकाशरूपब्रह्मपरत्वान्नानर्थकामिति भावः तमेव भान्तमित्यस्य तत्तत्र

ल॰
द॰
२२५

यो भाति न चंद्रतारकं नेमा विद्युतो भांति कुतोयमग्निरित्यादिएवंरूपाणाम् श्रुतीनामु
पलक्षणं यदादित्यगतंतेजोजगद्भासयतेखिलम् यच्चंद्रमसि यच्चाग्नौ तत्ते
जो विद्धि मामकमिति स्वयमेवात्मनात्मानं वेत्थत्वं पुरुषोत्तमेति स्मृतेश्च स्वय
म्प्रकाशकत्वस्यादित्यादिसाधारण्यात्वेत्युक्तम् उक्तश्रुत्यातेषामप्यन्यप्रकाश्य
त्वावधारणात्तत्त्वसाधारण्यम् तथाच स्वात्मनि नित्यज्ञानविषयत्वे स्वप्रकाश
त्वं पर्यवस्यति निर्मितानमानंदं ब्रह्मेति श्रुत्या सद्रूपस्य ब्रह्मणो नित्यज्ञानानंदस्व
रूपबोधनात् अतएव ग्रंथकारोऽप्रतिहतस्वग्रंथप्रचारार्थमखंडानंदस्वरूप।
नाप्रतिपादनपुरःसरं मंगलमाचरतीत्याह निर्विघ्नेति अप्रतिबद्धग्रंथप्रचारा
र्थमित्यर्थः अंतेऽप्यवसानेइत्यर्थः मंगलादीनि मंगलमध्यानि मंगलांतानि।
शास्त्राणि प्रथंतेइति भाष्यकृद्भिरुक्तेरिति भावः नतिरूपमिति न निस्तुतिस्मरणा
दिभेदेन तन्त्रानात्वं सूच्यते प्रणाम्यतेइत्यादीति प्रणतेश्च ब्रह्मात्मनि पूर्वोक्तम
प्रतिदतेस्तंव्रात्तद्धर्मानमेयान् एवं कतन्नत्याचरणे च स्वीयग्रंथप्रचारेच्छा। २२५

याविषयप्रतिपत्त्यर्थमेवेति २ अशेषभूषादातारमपि सर्वेश्वरं गुरुम् श्रीमद्भू
षणसारेण भूषये शेषभूषणम् ११ इति श्रीमत्पदवाक्यप्रमाणपारावारपारीण
धुरीणरंगोजिभट्टात्मजकौंडभट्टकृते वैयाकरणभूषणसारे स्फोटवादः समाप्तः ॥
ग्रंथश्च संपूर्णः । अत्रग्रपीयेनेन भूषणसारेण तदलंकरणस्यानिष्प्रयोजनक
तायद्यपि प्रतीयते तथापि यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् यत्तपस्य
सि कौंतेय तत्कुरुष्व मदर्पणमिति भगवच्छिक्षितत्वेन तत्प्रवृत्तिः सर्वदेव्याशयेनादृश्यं
शेषभूषणमित्यनेन च भाष्यकारस्मरणमप्यत्र मंगलमाचरितमिति शिवम् यो
लीलयैव विरचय्य पुराणि नानाख्यानचयेक्रममिता विषयान्समस्त विश्वादि
विग्रहदयं प्रविशत्यलिमं ये योगिनस्तमहमप्यवलंबनमामि यत्प्रेरितो विल
जनः कलत्रेनाभिनिवेशभाक् सर्वभूताशयस्थः स मत्कृतेनैव तुष्यतु ॥ इति श्री
कूर्माचलाभिजनोपनामतीयोपनामक हरिवल्लभविरचिते वैयाकरणभूषण
सारलघुदर्पणे स्फोटनिरूपणं समाप्तम् ॥ ॥

षषइति

ल॰ याविषयप्रतिपत्त्यर्थमेवेति २ अशेषफलदातारमपि सर्वेश्वरं गुरुम्‌ श्रीमद्भू
द॰ षणसारेण भूषये शेषभूषणम्‌ ॥ १२ इति श्रीमत्पदवाक्यप्रमाणपारावारपारीण
२२५ श्रि धुरीणरंगोजीभट्टात्मजकौंडभट्टकृते वैयाकरणभूषणसारे स्फोटवादः समाप्तः ॥
ग्रंथस्य संपूर्णाः । अत्र अपीत्यनेन भूषणसारेण तदलंकरणस्यानतिप्रयोजनक
तायद्यपि प्रतीयते तथापि यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्‌ यत्तपस्य
सि कौंतेय तत्कुरुष्व मदर्पणमिति भगवद्वचित्सैवं न त्वप्रवृत्तिः सर्वदेव्याशयेनाद्यं घघश्लि
शेषभूषणमित्यनेन च भाष्यकारस्मरणमप्युक्तं मंगलमाचरितमिति शिवम्‌ यो
लीलयैव विरचय्य पुराणि नानास्थानत्रयेक्रममितान्विषयान्समस्ति विष्णादि
विग्रहपरंप्रविवेशमिति स्वयं योगिनस्तमहमप्यभ्यवंतनमामि यन्मे विनोविला
जनः कर्तृत्वाभिनिवेशभाक्‌ सर्वभूताशयस्थः सतत्कृतेनैव तुष्यतु ॥ इति श्री
कूर्माचलाभिजनोन्वभानीयोपनामकहरिवल्लभविरचिते वैयाकरणभूषण
सारलघुदर्पणे स्फोटनिरूपणं समाप्तम्‌ ॥ ॥

८॥-)

सदुर्पणा
थाक ५१००
[illegible]दस्ता १ थाक १८